In Public domain. Digitization by Muthulakshmi Research Academy

सं.प.ग्र. - ५३

हरिहरतत्त्वभूमिका

संस्कृतपरिषत्

उस्मानियाविश्वविद्यालयः

हैदराबाद् - ५०० ००७.

२००४

शालिवाहन शकः १९२६

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

हरिहरतत्त्वभूमिका

श्री चिदानन्दभारतीस्वामिभिः विरचिता

प्रधानसम्पादिका

आचार्य के. कमला

सम्पादकः

डा. वी. श्रीनिवासशर्मा

संस्कृतपरिषत्, उस्मानियाविश्वविद्यालयः,

हैदराबाद्- ५०० ००७.

२००४

शालिवाहनशकः १९२६

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थोऽयं राष्ट्रियसंस्कृतसंस्थानस्य द्रव्यानुदानेन प्रकाशितः।

सर्वेऽधिकाराः स्वायत्तीकृताः

प्रथमावृत्तिः २००४

मूल्यम् - २५-००

उस्मानियाविश्वविद्यालयस्थसंस्कृतपरिषदा
प्रकाशितम्

चन्द्रिका मुद्रणालय :
गोखलेनगर, रामन्तपूर,
हैदराबाद् - ५०० ०१३.
दूरवाणी - २७०३७८४५

In Public domain. Digitization Muthulakshmi Research Academy
Sanskrit Academy Series No. 53

HARIHARA TATTVA BHUMIKA
of
SRI CHIDANANDA BHARATI SWAMI

Chief Editor

Prof. K. KAMALA

M. A. Ph.D

Editor

DR. V. SRINIVASA SARMA

M. A. Ph.D

SANSKRIT ACADEMY

Osmania University, Hyderabad- 500 007.

2004

This publication has been brought out with the financial assistance of Rastriya Sanskrit Sansthan, Ministry of H.R.D. Govt. of India, New Delhi.

In Public domain. Digitization-Muthulakshmi Research Academy

All Rights Reserved
First Edition 2004

Price Rs. 25-00

Published by

SANSKRIT ACADEMY

Osmania University,
Hyderabad - 500 007.
Ph : 040 - 27070281

Printed by
CHANDRIKA MUDRANALAYA,
Gokhalenagar, Ramanthapur,
Hdyerabad- 500 013.
Ph : 040- 27037845

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization Muthulakshmi Research Academy

विषयसूचिका

		पृष्ठसंख्या
१.	हरिहरतत्त्वभूमिका	१
२.	विष्णोर्वरिष्ठता - पद्मपुराणम्	४
३.	नामापराधः - पद्मपुराणम्	७
४.	जलन्धरवधाय हरिहरयोः कूटनीतिः - पद्मपुराणम्	८
५.	ईश्वरः पार्वतीं प्रति विष्णुभक्तिं विवृणोति - पद्मपुराणम्	९
६.	के वैष्णवाः? पद्म पुराणम्	१०
७.	विष्णुवीरभद्रयोः सङ्ग्रामः - स्कन्दपुराणम्	१०
८.	पार्वत्याः परिणये विष्णोराधिपत्यम् - स्कन्दपुराणम्	११
९.	तेजस्स्तम्भः - स्कन्दपुराणम्	१३
१०.	विष्णोर्महत्वम् - स्कन्दपुराणम्	१५
११.	वासुदेवभक्ताः	१६
१२.	पाशुपतस्य पराजयः	१६
१३.	शिवनिन्दकस्य निन्दा स्कन्दपुराणम्	१८
१४.	विष्णवे शङ्करस्य वरदानम् - स्कन्दपुराणम्	१८
१५.	ब्रह्माणं विष्णुं च रुद्रो ररक्ष। स्कन्दपुराणम्	१९
१६.	सुदर्शनस्य वैफल्यम्	२१
१७.	शिवकेशवयोरभेदप्रतिपादनस्य प्रमाणानि	२५
१८.	महेश्वरवचनानि - भविष्यपुराणम्	२५
१९.	शिवकेशवयोरभेदः	२६
२०.	महाभारतेतिहासः	२६
२१.	विष्णुधर्मोत्तरपुराणम्	२६
२२.	प्रह्लादवाक्यानि	२७
२३.	शिवकेशवयोरैकमत्यम् - स्कन्दपुराणम्	२७
२४.	विष्णोः प्रामुख्यम् स्कन्दपुराणम्	२८
२५.	मन्त्राणां समत्वम्	२८
२६.	शिवलिङ्गसालग्रामयोः समानत्वम् - स्कन्दपुराणम्	२८
२७.	दक्षाध्वरवृत्तान्तः	२८
२८.	शिवस्य आधिक्यम् स्कन्दपुराणम्	२९

In Public domain. Digitization Muthulakshmi Research Academy

पृष्ठसंख्या

२९. काशी-हरिहरक्षेत्रम् - ब्रह्मवैवर्तपुराणम् ३२
३०. काशी विष्णुहृदयादुत्पन्ना - ब्रह्मवैवर्तपुराणम् ३२
३१. वाराणसीस्तुतिः ३३
३२. शिवमुद्दिश्य विष्णोस्तपः ३४
३३. शिवब्रह्मणोः विष्णुस्तुतिः - आन्ध्रभागवतम् ३५
३४. श्रीकृष्णस्य महेश्वरविजयः - भागवतदशमस्कन्धात् ३५
३५. ब्रह्मविष्णुमहेश्वराः एकस्मादेव शरीरादजायन्त ३६
३६. कालिकापुराणम् ३६
३७. आन्ध्रमहाभारते सैन्धववधवृत्तान्तः। ३७
३८. सर्वेषामपि देवानां तत्त्वमेकमेव - भगवद्गीता ३८
३९. चतुर्मुख-पञ्चमुखकृता चतुर्भुजस्तवः - आन्ध्रभागवतम् ३९
४०. शिवकेशवयोर्युद्धे केशवस्य विजयः - आन्ध्रभागवतम् ४०
४१. शिवकेशवयोर्भक्त्यां तारतम्यम् - आन्ध्रभागवतम् ४०

उपयुक्तग्रन्थाः

१. विष्णुपुराणम्
२. पद्मपुराणम्
३. स्कन्दपुराणम्
४. भविष्यपुराणम्
५. ब्रह्मवैवर्तपुराणम्
६. कालिकापुराणम्
७. त्रिपुरमहोपनिषत्
८. भगवद्गीता
९. आन्ध्रमहाभागवतम्
१०. विष्णुसहस्रनामशङ्करभाष्यम्

In Public domain. Digitized by Muthulakshmi Research Academy

आन्ध्रदेशीयकृष्णामण्डले चिदानन्दाश्रमे श्रीभुवनेश्वरीपीठं राराजते, यत्र धर्मप्रचारो भवति, आर्तानां , जिज्ञासूनां, मुमुक्षूणां च सेवा विधीयते। श्रीमन्तो चिदानन्दभारतीस्वामिनः पीठाधीशाः वेद-शास्त्रेषु पुराणेषु च निष्णाताः विद्वांसः, इदानीं नवतिवर्षदेशीयाः धर्मप्रचाराय धर्मे समैक्यभावसिद्ध्यर्थं यतमानाः नैकान् ग्रन्थान् व्याख्यानरूपान्, सङ्ग्रहरूपान् च निर्माय आन्ध्र-गौर्वाणवाण्योः सेवां कुर्वन्ति।

श्रीमतां चिदानन्दस्वामिनां धर्मनिष्ठा प्रशस्या। आन्ध्रदेशे, निखिले च दक्षिणभारते हरिहरानुयायिनोः नितरां स्पर्धा प्रचलत्येव। आन्ध्रमहाभारतस्य अनुवादकाः श्रीमन्तो तिक्कनसोमयाजिनः ख्रिस्तो पञ्चदशे शतके हरिहराद्वैतं महाभारतावतारिकायां प्रतिपादयन्तः उद्घोषितवन्तः,

किमस्थिमालां किमु कौस्तुभं वा
परिष्क्रियायां बहु मन्यसे त्वम्।
किं कालकूटं किमु वा यशोदा -
स्तन्यं तव स्वादु वद प्रभो मे ।। इति

श्रीमन्तः चिदानन्दभारतीस्वामिनः स्कान्द-विष्णु-पद्म-भविष्य-ब्रह्मवैवर्त-कालिक-भागवतादीनि पुराणानि आलोड्य हरि-हरयोः अद्वैतं मिथः भगवद्भक्तिभावं च सप्रमाणमस्मिन् हरिहरतत्त्व-भूमिका इति ग्रन्थे निरूपितवन्तः। ग्रन्थोऽयं जिज्ञासूनां कृते बहूपकरोति इति दृढं विश्वसिमि, संस्कृतपरिषदा प्रकाश्यमानोऽयं ५३ तमो ग्रन्थः। भारतसर्वकारीयमानवसंसाधनमन्त्रालयान्तर्गतेन, राष्ट्रियसंस्कृत-संस्थानेन द्रव्यानुदानपुरःसरं प्रचाल्यते संस्कृंतपरिषद्। अतः राष्ट्रिय - संस्कृ तसंस्थानस्य कु लपतिमहो दयेभ्यः श्रीमद्भ्यो वेम्पटि कुटुम्बशास्त्रिमहाभागेभ्यः इतरेभ्यश्च अधिकारिभ्यो संस्कृतपरिषद् धन्यवादान् वितरति, येन ग्रन्थप्रकाशनं सुकरमासीत्।

In Public Domain. Digitized by Muthulakshmi Research Academy
उस्मानियाविश्वविद्यालयस्य उपाध्यक्षेभ्यः श्रीमद्भ्यः जे. अनन्तस्वामिमहाभागेभ्यः अन्येभ्यश्च परिषदः कार्यवर्गसभ्येभ्यः कृतज्ञतां निवेदयति परिषदियं येषां सहकारेण एतादृशं कार्यं सम्पन्नं भवति।

संस्कृतपरिषदि ग्रन्थसम्पादकः डा. वी. श्रीनिवासशर्मा, शोधकार्ये सहाकारी श्री. के.वी. सूर्यप्रकाशश्च ग्रन्थप्रकाशने यथोचितां सेवां कृतवन्तः तावभिनन्दयामि।

चन्द्रिकामुद्रणालयसंस्थया संस्कृतग्रन्थमुद्रणकार्यं सुष्ठु विधीयते। संस्थायां कार्यरतानभिनन्दयामि। ग्रन्थस्य गुणदोषनिर्णये सहृदयाः एव प्रमाणम्।

तारणनामसंवत्सरे
आषाढस्य प्रथमदिवसः
१८-०६-०४

इति
निवेदयत्री
के. कमला
निदेशिका

संस्कृतपरिषदः कार्यवर्गसभ्याः

१. श्रीमन्तः जे. अनन्तस्वामिमहाभागाः अध्यक्षाः
उस्मानियाविश्वविद्यालयस्य च उपाध्यक्षाः

२. श्रीमन्तः एम्. मुत्तारेड्डिमहाभागाः सभ्याः
उस्मानियाविश्वविद्यालयस्य च सचिवाः

३. श्रीमन्तः के. अरविन्दरावमहाभागाः सभ्याः
आन्ध्रप्रदेशीयसर्वकारीयरक्षकदलविभागे निदेशकप्रमुखाश्च

४. आचार्य बी. नरसिंहाचार्याः, सभ्याः
उस्मानियाविश्वविद्यालयसंस्कृतविभागाध्यक्षाः

५. आचार्या के. कमला- सभ्या,
संस्कृतपरिषदो निदेशिका, कार्यवर्ग संयोजिका च

In Public domain. Digitization Muthulakshmi Research Academy

श्री चिदानन्दभारतीस्वामिनः

भुवनेश्वरीपीठम्

गन्नवरम्

In Public domain. Digitization Muthulakshmi Research Academy

१ हरिहरतत्त्वभूमिका

In Public domain. Digitization Muthulakshmi Research Academy

भारते कलिमहिम्ना आस्तिकमहोदयाः अल्पसंख्याकाः भवन्ति, तेष्वपि ऐकमत्यं क्षीयत इति नितरां खेदं जनयति। शिवस्सर्वाधिक इति केचन, अन्ये विष्णुरेव सर्वाधिक इति प्रवदन्ति। अयं विवादःनितरां हास्यास्पदः। अज्ञानां वादस्तथा भवतु। विज्ञेष्वपीयं व्याधि-स्सङ्क्रान्तेति महत् दुर्भागधेयम्। शिवभक्ताः शिवस्य महिमानं कामं उच्चैर्वदन्तु, तथा विष्णुभक्ताः विष्णोर्महिमानं वर्णयन्तु न कोऽपि दोषः। किन्तु शिवभक्ताः यत् विष्णुं निन्दन्ति तथा वैष्णवाश्च परशिवं दूषयन्ति, तत् जनसमुदाये दैवभक्तेः विनाशाय कल्पते। अस्मिन् विवादे भगवता विष्णुना स्वयमुपदिष्टं वाक्यं श्रुणुमः :-

मद्भक्तश्शङ्करद्वेषी मद्द्वेष्टी शङ्करप्रियः।
उभौ तौ नरकं यातः यावच्चन्द्रदिवाकरौ ॥

अर्थात् :- यो मयि भक्तिं निधाय परमेश्वरं द्वेष्टि, एवं परशिवे भक्तिं निधाय मां द्वेष्टि, उभावपि नरकं प्रविश्य सूर्यचन्द्रस्थितिपर्यन्तं तत्र निवसेताम् अर्थात् शाश्वतयमयातनाभाजौ भवत इति ज्ञेयम् ।

शिवकेशवौ यद्यपि विभिन्नरूपं भजेते अथापि तयोस्तत्त्वमेकरूपमेव। ब्राह्मणाः स्वैः प्रत्यहमनुष्ठीयमाने सन्ध्यावन्दने शिवकेशवयोरेकत्वभावनया स्तुवन्ति। यथा --

शिवाय विष्णुरूपाय शिवरूपाय विष्णवे।
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥
यथा शिवमयो विष्णुरेवं विष्णुमयश्शिवः।
यथान्तरं न पश्यामि तथा मे स्वस्तिरायुषी ॥

भावः- विष्णुरिव स्थूलशरीरेण भासमानाय वस्तुतः शिवाय मम-प्रणामोऽस्तु। एवं लिङ्गरूपेण स्थूलशरीरेण विराजमानाय नारायणाय नमस्करोमि। यद्यपि शिवः जटाजूटे चन्द्रलेखां बिभ्राणः गजचर्माम्बरं

In Public domain. Digitization Muthulakshmi Research Academy
धृत्वा भस्मोद्धूलितमात्रः दृश्यते तथापि तस्य सूक्ष्मशरीरं अर्थात् हृदयं विष्णुस्वरूपमेव। श्रीमन्नारायणः नीलमेघच्छायः, पीताम्बरं धृत्वा चतुर्भिः करैः शङ्ख-चक्र-गदापद्मानि बिभ्राणः कस्तूरीतिलकाञ्चितमुखः कौस्तुभश्च वक्षस्यस्य दरीदृश्यते, तथापि तस्य हृदयं शिवमयमिति ज्ञातव्यम्। शिवकेशवौ विभिन्नाविति भेदभावः मम मनसि यथा नोत्पद्येत तथा मयि कृपां कुरु इति ब्राह्मणः प्रातर्मध्याह्नसायंसमयेषु परात्परं प्रार्थयते।

अथ श्रुति-स्मृति पुराणेषु वर्णितं शिवकेशवस्वरूपं साक्षात्कुर्मः।

जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः।
ब्रह्मीभूत्वास्य जगतो विसृष्टौ सम्प्रवर्तते।
सृष्टं च पात्यनुयुगं यावत्कल्पविकल्पना।
सत्त्वभृद्भगवान् विष्णुरप्रमेयपराक्रमः॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः।
मैत्रेयाखिलभूतानि भक्षयत्यतिदारुणः।
भक्षयित्वा च भूतानि जगत्येकार्णवीकृते॥
नागपर्यङ्कशयने शेतेऽसौ परमेश्वरः।
प्रबुद्धश्च पुनस्सृष्टिं करोति ब्रह्मरूपभृत्॥
(विष्णुपुराणम् प्रथमांशे द्वितीयाध्यायः ६१-६५)

जगदीश्वरो विष्णुः रजोगुणमाश्रित्य स्वयंभूः भूत्वा जगदिदं सृजते। सृष्टं जगत्-युगकालानुसारेण यावत्कल्पविकल्पनं सत्त्वगुण - माश्रित्याप्रमेयपराक्रमेण विष्णुरूपेण पालयति। कल्पान्ते तमोगुण-माश्रित्य जनार्दनो रुद्रो भूत्वा नितान्तभयोत्पादनपुरस्सरं सर्वभूतानि भक्षयति अर्थात् नाशयति। पञ्चभूतानां स्वरूपनाशानन्तरं जगज्जलमयं भविष्यति। तदा परमेश्वरः शेषशयने निद्रामुद्रामुपैति। अथ कतिपयकल्पकालानन्तरं जागृतस्सन् स एव ब्रह्मरूपी भूत्वा पुनः जगत् सृजति। भगवानेक एव श्रीहरिः। सृष्टि-स्थिति-लयकारिणी ब्रह्म-

विष्णु-शिवाग्निका शान्तरूपेऽघोरविद्यासंज्ञिकामाश्रित्य स्वा। सा सृष्टिकर्त्री भूत्वा आत्मनाऽऽत्मानं सृजति, विष्णुत्वं गता रक्षति, संहर्त्री सती सर्वं संहरति। एक एव परमात्मा सृष्टिस्थितिलयकर्माणि निर्वहति। तमेव ब्रह्मेति विष्णुरिति महेश्वर इति च आमनन्ति सूरयः।

देवीभागवतस्य सप्तमस्कन्धे शिवकेशवयोर्न्यूनताधिक्ये प्रतिपादिते शौनकादिमुनयः सूतमहर्षिं प्रति एवं जगदुः -

स्वामिन् ! सर्वाघसंहारशालि श्रीकृष्णचन्द्रस्य दिव्यचरितं भवद्भिस्सविशदं बोधितम्। यथा- श्रीकृष्णः अरण्यं प्रविश्य विश्वेश्वरं शिवमुद्दिश्य घोरं तपस्तेपे इति, तेन गौरी हृष्टा सती अभीष्टं वरमदादिति च भवन्तः अवोचन्। श्रीकृष्णः जगदीश्वरः किल तस्य कीदृशो ह्रासो विद्यते ? गौरीशङ्करौ ततोऽपि किं महान्तौ ?

सूतः :- हे महानुभावाः कृपया श्रुणुत, यन्मां प्रति व्यासमहर्षिभिरुपपादितम्। श्रीकृष्णः सर्वेश्वरः लोकानां सर्जने विवर्धने संहारणे च समर्थः। सः उपासकेभ्यः सर्वसिद्धिं वितरति। सोऽपि प्राकृत इव घोरं तपस्तेपे इति यद्वदन्ति तद्यथार्थमेव। श्रीकृष्णचन्द्रः परमेश्वरो भवन्नपि मानवशरीरं दधार। तदनुरूपतया वर्णानामाश्रमाणां च धर्मान् आचरति स्म। वयोवृद्धान् समभावयत्। प्राकृत इव गुरुकुले उषित्वा पादाभिवन्दनपुरस्सरं गुरुसेवां विधाय विद्यां जग्राह। देवान् विप्रांश्च समानर्च। दुःखितेषु स्वजनेषु स्वयं खिन्नः, तेषु हृष्टेषु स्वयं जहर्ष। शमन्तकमणिवृत्तान्ते दैन्यं लोकापवादमपि स्वीचकार। कान्तासु कामोपभोगमकार्षीत्। शरीरधारणवशात् कामक्रोधादयः कदाचित् संभवन्ति। यस्मादिदं शरीरं सत्त्वरजस्तमोगुणमयं तत्कथं निर्गुणत्वं युज्यते ! सौभरिशापादष्टावक्रस्य शापवशाच्च यादवानां विनाशेन श्रीकृष्णस्यापि देहत्यागस्संबभूव।

श्रीकृष्णः मिषतां सर्व-नृपाणां रुक्मिणीं रथमारोप्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Rashtriya Sanskrit Research Academy
प्रतिस्पर्धिनो विजित्य रुदंसपिवाहविधिना परिणिनाय। श्रीकृष्णस्य निवासस्थानं द्वारकानगरं नरकजरासन्धयो-र्दुराक्रमणस्य लक्ष्यमभूत्।

श्रीकृष्णः महाविष्णोरवतारभूतस्य नारायणमुनेरंशात् अवातरीत्। अतोऽस्य शिवसेवायां वैपरीत्यं न किञ्चित् विद्यते। सदाशिवस्सर्वेश्वरः। विष्णोरपि स एव जन्मकारणम्। कृष्णादय-स्सर्वेऽपि सदाशिवांशादेव जन्मानि लेभिरे। यः प्रणवाख्यः ओङ्कारो विद्यते, तदन्तर्गतः प्रथमाक्षरः अकारो ब्रह्मवाचकः उकारो विष्णुवाचकः मकारश्शिववाचकः। तदुत्तरवर्तिनी अर्धमात्रा महेश्वरीमभिधत्ते। सैव सर्वाधिकेति ज्ञातव्यम्। ओङ्कारार्थगत्या रुद्रो विष्णोरुत्कृष्टः विष्णुश्च ब्रह्मणः, अतः श्रीकृष्णस्य शिवार्चनं सङ्गतमेव।

शिवस्य य उत्कर्षः दृश्यते सःदेवीसन्निधानवशादेवेति ज्ञातव्यम्। युगे युगे श्रीमन्नारायणेन ध्रियमाणा अवतारः योगमायाप्रभावेण सम्पद्यन्ते। सा परदेवता भूसंचालनेन जगतः सृष्टिं वृद्धिं प्रलयञ्च कल्पयति, सैव ब्रह्म-विष्णुमहेश्वराणां तत्तदवतारान् परिकल्प्य क्रीडयति।

पूर्वोक्तेनोपाख्यानेन ज्ञायते यत् विष्णोरपेक्षया शिवो वरिष्ठ इति।

२. विष्णोर्वरिष्ठता

पद्मपुराणे सृष्टिखण्डे एकादशाध्यायः।

पुरा सृष्टिकर्तुर्ब्रह्मणः पञ्च मुखान्यासन्। एवंविधो ब्रह्मा तत्र चतुर्भिर्वदनैः चतुरो वेदानुच्चरन् ऊर्ध्वमुखेन पुराणेतिहासान् वेदरहस्यानि च प्रवक्ति स्म। अनेन सामर्थ्येन नितरां गर्वितः सः सुरानवागणयत्। तस्य तेजसा सुरपतितेजः सूर्यस्य पुरस्तात् दीपशिखेव कुण्ठी-भूतम्। तं साक्षात्कर्तुं न कोऽपि प्राभवत्। एवं स्थिते स्वापमानमसहिष्णवः सुराः तदहङ्कृतिमसहमानाः महेश्वरमुपसृत्य ब्रह्मणो गर्वमपाकर्तुं प्रार्थयामासुः। शिवः तैस्सह ब्रह्माणमुपजगाम। ब्रह्मा स्वसान्निध्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Muthulakshmi Research Academy
मुपगतेषु तेषु कटाक्षमपि न प्रासारयत्। शिवः उग्रीभूत्वा स्ववामाङ्गुष्ठनखेन ब्रह्मणः ऊर्ध्वमुखं कदलीकाण्डमिव चिच्छेद। तथा छिन्नं च तच्छिरः शिवस्य अञ्जलौ पपात। शिवः आनन्दताण्डवमकरोत्, सुराश्च नितरां मुमुदिरे। किन्तु तं ब्रह्महत्यापातकं समावृणोत्। महेश्वरो विषण्णः ब्रह्महत्यामहापातकस्य दूरीकरणाय ब्रह्माणं नितरामस्तौषीत्। ब्रह्मा तमेवं जगाद यत् श्रीमन्नारायणः भवतस्सखा, तमाश्रित्य ब्रह्महत्यापातकाद्विमुच्यसे स एव भवन्तं पुनाति, यतः ब्रह्मघ्नस्य दर्शनेन स्पर्शनेन संभाषणेनापि पापं भवति तत् परिहाराय सचेलं स्नानमाचरेत्। अतस्त्वं ब्रह्मवधदोषनिवारकं व्रतं कुरुष्वेत्युक्त्वा निर्ययौ।

अथ रुद्रो विष्णुं ध्यात्वा साष्टाङ्गं प्रणिपत्य एवं अस्तौषीत्।

नमामि नारायणमप्रमेयं
कृते सितं द्वापरतश्च रक्तम्।
कलौ च कृष्णं तमथो नमामि
ससर्ज यो वक्त्रत एव विप्रान्॥
भुजान्तरात् क्षत्रमथोरुयुग्मात्
विशः पदाग्राच्च तथैव शूद्रान्।
नमामि तं विश्वतनुं पुराणं
परात्परं पारगमप्रमेयम्॥ (१४-२४५, २४६)
न चात्र किञ्चित्पश्यामि व्यतिरिक्तं तवाच्युत।
त्वन्मयं च प्रपश्यामि सर्वमेतच्चराचरम्॥

अप्रमेयाय श्रीमते नारायणाय नमोऽस्तु। यो देवः कृतयुगे श्वेतः द्वापरे रक्तवर्णः कलौ कृष्णवर्णः(अत्र त्रेतायुगः परित्यक्तः त्रेतायामपि कृष्णवर्ण इति प्रतिभाति।)

यो देवः मुखात् ब्राह्मणान्, भुजाभ्यां क्षत्रियान् ऊरुभ्यां वैश्यान्, पादाभ्यां शूद्रान् ससर्ज, तं विश्वतनुं पुराणपुरुषं नमामि। हे अच्युत। सृष्टौ त्वत्तः अन्यत् न किञ्चिद्विद्यते। चराचरात्मकं जगत् कृत्स्नमपि

In Public domain. Digitization Muthulakshmi Research Academy

भवद्रूपमेवेति ब्रह्मधा तुष्टाव तमन्यतं शिवः।

इत्थं स्तूयमानो दयामयो विष्णुः गरुडवाहनः तं गिरिं भास्कर इव प्रकाशयन् साक्षात्कृत्य स्वाभीष्टं प्रार्थयेति शिवमुवाच :- शिवः स्वामिन् ब्रह्महत्यापातकं मां न जहाति मोचय, इतोऽधिकं प्रार्थनीयं न किञ्चिदस्ति। भवन्तं विहाय न कोऽपि रक्षकोऽस्ति, ब्रह्महत्यापातकावरणात् मम शरीरं नीलवर्णं जातम्। शरीरात् शवगन्धः आयाति, आभरणानि आयसानि जातानि, मम पूर्वरूपं कथं पुनरेति ? मया किं कार्यम् ? अनुगृहाण इति प्रार्थयामास।

भगवान् नारायणः एवमुवाच - हे शङ्कर ! ब्रह्महत्यादोषः नितरां तीव्रः अनेकान् सङ्कटान् जनयति। एतत्पापकार्यं मनसापि न चिन्तयेत्। त्वमिदानीं ब्रह्मणा प्रोक्तं व्रतमाचर। प्रत्यहं त्रिकालेषु सर्वाङ्गानि भस्मलिप्तानि विधेहि। शिरसि कर्णयोः हस्तयोश्च अस्थीनि धारय। एवं कृते भवान् क्लेशेभ्यः मुक्तो भविष्यति। एवमुक्त्वा श्रीमन्नारायणः अन्तरधात्।

अथ शङ्करः ब्रह्मकपालं करेण धृत्वा भुवं परिबभ्राम। एवं हिमालय-मैनाक-मेरु-कैलास विन्ध्यपर्वतेषु सञ्चचार। काञ्ची-काशी-ताम्रलिप्तमगधादि पुण्यक्षेत्रेषु सञ्चचार। इत्थं महता सञ्चारेणापि करस्थो ब्रह्मकपालः हस्तान्न मुक्तः। प्रसह्य करसञ्चालनेन उत्प्लवनेन अधःप्लवनेन धावनेन कथंकारमपि कपालः करं न पर्यत्यजत्। अथ शिवः ब्रह्मोपदिष्टं व्रतमाचरितुमियेष। निश्चलचित्तेन ब्रह्मध्यानतत्परो भूत्वा ध्याननिष्ठया प्रीतः प्रजापतिरवश्यं मह्यं वरं दास्यतीत्यमन्यत। एवं स्थिते ब्रह्मा स्वयमागत्य भूमौ पतितं शङ्करमुत्थाप्य हे चन्द्रशेखर ! भवदभीप्सितं ब्रूहि दास्यामीत्यवोचत्। शिवोऽब्रबीत् :- भगवन् एष कपालः मम हस्तं न जहाति, एतदतीव लज्जाकरम्। भवदुपदेशानुसारेण कापालिकव्रतमाचरम्। अथापि न मुमोच। कदा वा परित्यक्ष्यति, कदा वा अहं पूतो भविष्यामि कृपया वदतु। ब्रह्मा ब्रवीति शङ्कर ! अविमुक्त-

CC-0. Prof. Satya Vrat Shastri Collection. Digitization Muthulakshmi Research Academy
नामकं प्राचीनं क्षेत्रमास्ते। तत्र कपालमोचनसमर्थं तीर्थमास्ते। तत्राहं भवान् विष्णुश्च निवसामः तदेव काशीक्षेत्रम्। तत्र यो भवन्तं पश्यन्ति महापापिनोऽपि ते पूता भवन्तः मम सन्निधिं प्राप्य सर्वसौख्यान्यनुभवेयुः। तत्र "वरणा" "असी" इति विख्याते द्वे नदी विद्येते। तयोर्मध्ये वर्तमाने क्षेत्रराजे ब्रह्महत्यादोषः न प्रविशति। सैव वाराणसी। तत्र निवसन्तो जनाः मरणसमनन्तरमेव हंसवाहनमधिरुह्य स्वर्गं प्रविशेयुः। तत्र निर्भीकाः सञ्चरेयुः। वाराणसी विंशतिक्रोशविशाला नगरी। तां तुभ्यमदाम् तत्र सुरपतिप्रमुखा देवाः समागत्य मया सह निवसेयुः। भवत्करस्थं कपालं तत्र विसृज। तत् पुण्यक्षेत्राणामुत्तमम्। तत्र निवासिनः भवन्तमर्चयन्तः ये प्राणान् विसृजन्ति, ते भवदाकृतिं लब्ध्वा भवता सह सुखेन जीवेयुः।

तच्छ्रुत्वा शङ्करो वदति हे चतुर्मुख मह्यमिमं वरं प्रसादय, यत् धरित्र्यां यानि यानि पुण्यक्षेत्राणि सन्ति, तेषु सर्वत्राहं यथा विष्णुना सह निवसामि तथा अनुजानीहि। चतुर्मुखः तथास्त्विति प्रोच्य श्रीमन्नारायणः भवदभीष्टानुसारेण करिष्यति नात्र संशय इत्युक्त्वान्तर्दधौ। (अनेन उपाख्यानेन नारायणः महेश्वरादधिक इत्यवगम्यते।)

३. नामापराधः

पद्मपुराणे ब्रह्मखण्डे २५ तमः अध्यायः।

सतां निन्दा नाम्नः परममपराधं बुधजनाः।
वदन्त्येनां कर्तुं न खलु मनुजः कोऽपि यतते।
शिवस्य श्रीविष्णोर्य इह गुणनामादिसकलं
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः॥

शिवकेशवयोर्दूषणं पापहेतुरिति अभिज्ञाः वदन्ति। एवं स्थिते शिवस्य नामानि गुणाः, विष्णोर्नामानि गुणाश्च भिन्ना इति भावनैव दोषावहा। तथा यो मनुते सः भगवतः अपकरोति पापात्मेति अवगन्तव्यम्।

In Public Domain. Digitization by Muthulakshmi Research Academy

४. जलन्धरवधाय हरिहरयोः कूटनीतिः

पद्मपुराणस्य उत्तरखण्डे हरिहरयोः कूटनीतिः

महेश्वरं प्रति जलंधरः घोरं तपः तप्त्वा तत्प्रसादितवरमहिम्ना देवान् नितरां बाधते स्म। ते आत्मरक्षणाय शिवसन्निधिं प्राप्य आत्मनः क्लेशान् निवेदयामासुः। क्लेशानाकर्ण्य दुष्टशिक्षकं विष्णुमुपगम्य शिवः एवमभाणीत्। अयि नारायण ! जलंधरःभवन्तं हन्तुमुद्यतःकिल। तदा त्वं तमुपेक्ष्य वैकुण्ठमेव त्यक्तवान्| तत्र को हेतुः ?

विष्णुरुवाच- जलंधरस्य जननं भवदनुग्रहेण सञ्जातम् एतत्प्रथमकारणम्। तस्य जननं सागरे संवृत्तमिति, सः लक्ष्म्याः सोदर इत्यन्यो हेतुः।

जलन्धरः महातेजस्सम्पन्नः। तस्य वधाय ममायुधानि नालम्। सर्वेभ्यो देवेभ्यः स्वीयायुधानि मह्यं दापयेति शिवः उवाच| हरिः साकूतं देवानद्राक्षीत्| सर्वे देवाः स्वतेजांसि शिवसादकुर्वन्। तथा सम्प्राप्तेन तेजःपुञ्जेन शिवो विलक्षणं शस्त्रं निर्माय अवशिष्टेन तेजसा ज्वालामालिकाभीषणमन्यत् सुदर्शनम्, अपरं वज्रायुधञ्च निर्ममे। जलन्धरस्तदैव कैलासपर्वतप्रान्ते दैत्यनिवहेन सह दृष्टिगोचरो बभूव। महेश्वरस्तानसुरान् संहर्तुमारभत। हतान् दैत्यानसुरगुरुश्शुक्रः मृतसञ्जीवनीविद्यया चेतयितुमारभत। तदा महादेवमुखात् अतिभीषणा कृत्याख्या संहरणशक्तिः प्रादुरभवत्। तस्याकृतिरत्युन्नता, यथा स्फिचौ तालसदृशौ, वक्त्रं गिरिगुहेव, स्तनौ स्थूलशिलायमानौ ययोर्घातेन वृक्षाः भज्यन्ते। सा कृत्या समराङ्गणं प्रविश्य दैत्यान् भक्षितुमारभत। तां विलोक्य दैत्यगुरुः स्वकीयावयवेषु दैत्यान् संबध्य विहायसमुत्प्लुत्यान्तर्दधे। जलन्धरं हन्तुं नन्दीश्वर- गणेश्वर- कार्तिकेयान् अपि प्रार्थयन् न कृतार्थः रुद्रः कर्तव्यमूढो बभूव। जलन्धरसामर्थ्यस्य मूलं तत्पन्याः बृन्दायाः पातिव्रत्यमहिमैव इति श्रीमन्नारायणो विवेद। जलन्धरहननाय तस्याः पातिव्रत्यदूरीकरणमेव साधनमिति निश्चित्य

In Public domain. Digitization Muthulakshmi Research Academy
विष्णुः जालन्धरपुरं प्राविशत्। पश्चाज्जलन्धराकृतिं धृत्वाऽन्तःपुरं प्रविश्य बृन्दया कामक्रीडां विधातुमारभत। एवं गच्छति काले कदाचिद्रतान्ते सा विष्णोर्निजरूपमद्राक्षीत्। आग्रहोदग्रा सा धिक् परदाररतासक्तम्। भवान् नीचः। भवद्द्वारदेशे स्थिताः मुनय एव मायामाश्रित्य राक्षसा भूत्वा भवतः पत्नीमपहरेयुः। भवान् पत्नीविरहदुःखितः अरण्येषु भ्रममाणः वानरसाहाय्येन पत्नीं लप्स्यसे इति शप्त्वा शोकार्ता रुरोद। विष्णुना निवार्यमाणापि सा प्रसह्य ज्वलदग्निं प्रविश्य भस्मसाद्बभूव। पश्चात्सङ्ग्रामे जलन्धरः अम्रियत। अनेन ज्ञातव्यांशः - दुष्टशिक्षणे शिवकेशवावन्योन्यं सहयुञ्जात इति। शापभञ्जनसमर्थोऽपि श्रीहरिः जगतः पातिव्रत्यमहत्वबोधनाय शापं शिरसा गृहीत्वा तत्फलं रामावतारे अनुबभूव।

५. ईश्वरः पार्वतीं प्रति विष्णुभक्तिं विवृणोति पद्मपुराणस्य उत्तरखण्डे २२४ अध्यायः।

पार्वत्युवाच, स्वामिन् महादेव, त्रिपुरान्तक, सुरेश्वर सर्वेषां प्राणिनां मुक्तिदायिनीं विष्णुभक्तिमधिकृत्य वैपुल्येन श्रोतुमिच्छामि।

महादेवः उवाच देवि ! सुष्ठु भणितम्। विषयोऽयं सर्वलोकानां हितं करोति। श्रीमन्नारायणः सदातनं वासुदेवतत्त्वमित्यवेहि। स एव परमात्मा परञ्ज्योतिः स महितात्मा नित्यः ईश्वरो रुद्रश्च। तदुपासनाय बहवो मार्गास्सन्ति। अवहिता भव वदामि। तेषामाद्यो मार्गः वैष्णवः। विष्णुभक्तः शङ्खचक्रगदाचिह्नानि ऊर्ध्वपुण्ड्राणि च धृत्वा देवमर्चयेत्। विष्णोः स्मरणं कीर्तनं वन्दनं पादसेवनं, पादोदकपानं, प्रसादस्वीकरणं, विष्णुभक्तानां सेवनं द्वादशीव्रताचरणं च अर्चाविधानानि। श्रीमन्नारायणः स्वशरीरस्य दक्षभागात् जगतः सृष्टयर्थं ब्रह्माणं जगद्रक्षणार्थं वामभागात् कृष्णं जगत्संहरणार्थं मध्यभागाद्रुद्रं च ससर्ज। अतस्त्रिगुणात्मकः पुरुषः एक एव।

एवं स्थिते केचिद् यत्- ब्रह्मा रजोगुणमयः विष्णुस्सत्वगुणः

CC-0. Muthulakshmi Research Academy. Digitized by eGangotri
रुद्रस्तमोगुणस्य इति वदन्ति। वस्तुतः एक एव विष्णुः त्रीणि रूपाणि धृत्वा सृष्टि-स्थिति लयानाचरति। अतस्तिसृषु मूर्तिषु भेदभावो न कर्तव्यः।

६. के वैष्णवाः

पद्मपुराणस्य द्वितीयाध्याये प्रतिपादितमेवम्

विष्णुरुवाच -

हे चतुर्मुख ! अपि जानासि वैष्णवाः के इति ? श्रुणु ! ये जनाः भवन्तं मां शङ्करं च तुल्यान् मन्वते ये च मनोवाक्कायशुद्ध्या अतिथीन् पूजयन्ति, क्षुधार्तानन्नेन तर्पयन्ति ते एव वैष्णवाः। अनेन मानवसेवैव माधवसेवेत्यार्योक्तिरन्वर्था भवति।

७. विष्णुवीरभद्रयोस्सङ्ग्रामः

स्कन्दपुराणे माहेश्वरखण्डे चतुर्थाध्याये-

दक्षाध्वरध्वंसनाय रुद्रतेजस्सम्भूतो वीरभद्रः अध्वरं प्राविशत्। दक्षप्रजापतेराह्वानेन श्रीमन्नारायणः यज्ञशालायां स्थितः। सः वीरभद्रेण योद्धुमुदतिष्ठत्। तं दृष्ट्वा वीरभद्रः कथयति-विष्णो ! भवानत्र किमर्थ-मागतोऽसि। दक्षपक्षमाश्रित्य किं दृष्टम् ? भवदागमनं यज्ञभागार्थं किल!तमहमेव समर्पयामि। इत्युक्त्वा नारायणं प्रणनाम। पश्चादुपगम्य इत्थमवोचत्।

विष्णो ! मम यथा शिवः, भवानपि तथैवाराध्यः। तथापि हे पराक्रमिन् ! युद्धकामनया मामुपागतः। यदि भवानत्रैव स्थास्यति तर्हि भवन्तं पुनरावृत्तिरहितपन्थानं प्रापयामि।

एतदाकर्ण्य सर्वेश्वरः हसन्नवादीत्-हे महामते ! भवान् रुद्रतेजस्संभूतः पावनो महापुरुषः। दक्षः यज्ञं सन्निधेहीति मां मुहुर्मुहुराजुहाव। अहमपि शङ्कर इव भक्तकिङ्करः। अत एवागतोऽस्मि।

In Public Domain. Digitized by eGangotri Sarayu Trust. Funding by MoE-IKS
हे रुद्रकोपसमुद्भव! वीरभद्र! भवसमाहमस्यत्र प्रापयामि शक्तिश्चेन्मां प्रापयेत्यवोचत्। तदाकर्ण्य वीरभद्रः प्रहस्य विनयान्वितः एवमुवाच। अस्मादृशाःसर्वेऽपि भवतः शङ्करस्यापि किङ्करा एव।

तच्छ्रुत्वा विष्णुरुवाच-यद्येवं तर्हि भवान् आयुधैः परिवेषयतु अहं मम निवासं प्रयास्यामि। तदाकर्ण्य वीरभद्रः उच्चैर्जगर्ज। विष्णुरपि दिग्भेदनध्वनिमकार्षित्। शङ्खमुच्चैरपूरयत्। दिग्भेदनपटुमुभयोर्निनाद-माकर्ण्य सुरा युद्धं परित्याज्याधावन्। सुरपतिर्लोकपालाश्च सङ्ग्राम-व्यूहमकल्पयन्। इन्द्रं नन्दीश्वरं वज्रायुधेन जघान। वीरभद्रः महोग्रस्सन् इन्द्रं हन्तुमुद्ययौ। प्रेक्षका हाहाकारैर्ननदुः। सपदि वीरभद्र इन्द्रस्य पुरतः स्थित्वा वीरभद्रं लक्षीचकार। विष्णुवीरभद्रयोर्युद्धं प्रावर्तत। विष्णुः चक्रायुधं प्रायोजयत्। तं वीरभद्रः गिलति स्म। सपदि विष्णुः तस्य कण्ठममर्दयत्। तेन सुदर्शनं वक्त्राद्बहिर्निस्ससार तं गृहीत्वा नारायणस्सपदि वैकुण्ठमधावत्।

इयमाख्यायिका शिवकेशवयोस्समत्वमेकत्वमपि ज्ञापयति। अज्ञानवशात् यद्यपि भेदभाव उदेति तथापि तं भावं ते सूक्ष्मेक्षिकया अपनयन्तीति ज्ञायते।

८. पार्वत्याः परिणये विष्णोराधिपत्यम्

स्कन्दपुराणे माहेश्वरखण्डे २१ तमाध्याये इत्थं निरूपितमस्ति पश्यत।

महेश्वरं परिणेतुं पार्वती हिमवन्नगे तीव्रं तप आचरति स्म। तपोऽग्निमसहमानास्सुराः श्रीमन्नारायणस्य शरणं ययुः। शेषतल्पे शयानः श्रीमन्नारायणः एवमाह - हे सुराः सर्वेऽपि वयं मिलित्वा श्रीमन्नारायणसन्निधिं प्राप्नुमः। गिरिराजसुता भवता वोढव्येति प्रार्थयामः। पाणिग्रहणाय प्रयाणव्यवस्थां तत्रैव निर्वहामः। इति नारायणोक्तं निशम्य सुरा ऊचुः।

विरूपाक्षसन्निधिं वयं न गच्छामः। पुरा तत्पुरस्तात् स्थितं

In Public domain. Digitization Muthulakshmi Research Academy
मदनं सः नेत्राग्निना भस्मसात्कृतवान् किल, अस्माकमपि सैव गतिर्भवेत्। तदुक्तं निशम्य विष्णुरित्थं जगाद।

हे सुराः मा भैष्ट। स शिवरूपः सदाशिवः अर्थात् मङ्गलकरः। ततो विष्णुना सह सर्वे देवाः प्रातिष्ठन्। अग्रे ब्रह्मविष्णू तदनु देवाः ऋषयश्च त्वरया प्रतस्थिरे। सर्वेऽपि वेदोपनिषत्प्रतिपादितस्तोत्राणि जगुः।

शिवो नारायणं वदति,माधव। हैमवती आत्मनस्तपसा मां जितवती। तां परिग्रहीतुं हिमालयं जिगमिषामि। हरे! यथार्थं श्रुणु। पुरा दक्षः मह्यं कन्यां सङ्कल्पमात्रेण ददौ न तु मन्त्रपूर्वकम्, अधुना मन्त्रविधिना कर्तव्यम् तत्पौर्वापर्यं न वेद्मि, अतो भवता सदा सन्निधाय सदाचारविधिना निर्वोढव्यम् सकलं कार्यजातम्। तच्छ्रुत्वा विष्णुर्हसित्वा यावत्प्रवक्तुमियेष तावत् ब्रह्मा आजगाम।

विष्णुः सहर्षं शिवशिरस्थितं जटाजूटं परिष्चकार। अन्ये अन्यान्याभरणान्यपि समीचक्रुः। वरः विष्णोः हस्तमवलम्ब्य शनैः नन्दिनमारुरोह। शिवस्य कश्चित् संशय उदियाय यत् लाजहोमादिषु कन्यायास्सोदरेण स्थातव्यं किल, सोदरस्तु मैनाकः स समुद्रे वर्तते, कथं निर्वोढव्यमिति तत्तथास्तु इति विष्णुराह। शङ्करविवाहकोलाहले जनसम्मर्दो भविष्यति तस्माद्भवदीयभूषणविषये जागरूकैः भवितव्यम्।

विष्णुरुवाच - न किञ्चिदावश्यकं इदमेकमनुगृहाण यत् त्वयि सर्वदा दृढां भक्तिं प्रसादय इति। शङ्करः अनितरदुर्लभा भक्तिर्मयि भूयादिति विष्णवे वरं ददौ।

अनेन वृत्तान्तेन माधवश्शिवभक्त इति ज्ञायते।

In Public domain. Digitization by Muthulakshmi Research Academy

२. तेजस्स्तम्भः

स्कन्दपुराणे महेश्वरखण्डे प्रथमाध्याये सनकमुनिं प्रति ब्रह्मणः कथनम्।

सृष्ट्यारम्भे सदाशिव एवं संचकल्पे, यदहं ब्रह्मरूपो भवामि। पुरा अहं नारायणश्च समकाले जन्म जगृहिव। सृष्टिकर्ता हि महानिति ब्रह्मा पोषकोऽहं महानिति विष्णुश्च विवदन्तौ परस्परं योद्धुमारभेताम्। अहङ्कारः अवर्धत। सङ्गरो ववृधे। तस्यानिरोधने जगन्नाशो भवितेति मत्वा दयामयस्सदाशिवः तयोर्मध्ये महोन्नतं स्तम्भमसृजत् यस्याद्यन्तो न ज्ञायेते। सः चतुर्दशभुवनान्यतिलङ्घ्य वर्तते स्म। युद्धस्य का गतिः? तावुभौ भ्रान्तौ स्तम्भं वीक्षमाणौ आस्ताम्। तदा अशरीरवाणी एव-मवादीत्। अयि भोः मूढौ कुतः कलहायेते, उभयोरपि न्यूनाधिकते सदाशिव एव विलोकते। पुरतो विराजमानस्तेजस्स्तम्भः शिवरूपमेव। अस्यादिमन्तश्च यो विजानीयात् स एव बलवान्।

तदाकर्ण्याहं (ब्रह्मा) शिरस्तलं प्राप्तुकामः विहायसि ऊर्ध्वगमनमारेभे। पाददर्शनकामो नारायणः अधो गमनाय उपाक्रमत। संवत्सरा कोटिशःव्यतीताः अधोभागो नादृश्यत।शरीरस्य सन्धिबन्धानां शैथिल्येन परिश्रान्तो नारायणः आत्मनः मूर्खतामेवं निनिन्द। आद्यन्त-रहितस्य तस्य महात्मनः सङ्कल्पादेवाहं जातोऽस्मि। सदाशिवो यं पातुं समीहते स परिरक्ष्यते। सपदि तस्य ज्ञानमुदेति। अतोऽहङ्कारमुज्झित्वा विष्णुः शङ्करं शरणं प्रपद्ये। तस्यानुग्रहेण विष्णुः सुदूरमधस्थितं भूतलं प्राप। अहन्तु (ब्रह्मा) बहुवत्सराणि विहायसि ऊर्ध्वमगमम्। नेत्राणि स्फारितानि, हस्तयोर्निस्तारः पादयोः पीडा जाता, नितरां श्रान्तोऽभवम्। यावद्यावदुद्गच्छामि ततः उपरितले तेजोमण्डलं दृश्यते, तावत् शिवानुकम्पया ब्रह्मा उपरितलवीक्षणप्रयत्नाद्विरराम। शिवमहिम्ना ब्रह्मादयः कोटिशः उत्पद्यन्ते। शिवो यदि तेभ्यः सद्बुद्धिं प्रसादयति

In Public domain. Digitization Muthulakshmi Research Academy
तर्हि तेषामहङ्कारो नश्यति इति सिद्धानां वाक्यानि शवणगोचराण्यभवन्। शङ्कर एव आत्मनो महिमानं प्रदर्शयित्वा अस्मदहङ्कारमुन्मूलितवान्। मूर्खं मामनुग्रहीतुं ब्रह्मणोऽहङ्कारमपाकर्तुं च स भूतपतिरेव समर्थः। तेजः स्तम्भस्य मूलदर्शनेऽशक्तः मदहङ्कारो विनष्टः मम सदाशिवे भक्ति-रुदियाय इति मेने विष्णुः। इदानीं शिवं स्तौमि इति चिन्तितवान् ब्रह्मा।

यस्य महेश्वरस्य दक्षिणवामभागाभ्यां अहं बह्मा च उत्पन्नौ, तं विना को वान्यो रक्षकोऽस्ति ? इति शङ्करमेवमस्तुवातां तावुभौ।

जय पृथ्वीमयाकार जय चापोमयाकृते।
जय प्रभाकराकार जयामृतकराकृते॥ १-४-१४-८

तदा तं तेजस्स्तम्भं विदार्य मेघमध्यस्थः शशाङ्कवत् शिव आविरभवत्। कैलासशिखरधवलः वृषेन्द्रवाहनः बालचन्द्रालङ्कृत-जटाजूटः व्याघ्राजिनधरः महेश्वरः प्रत्यक्षो बभूव। प्रसन्नदृशा शिवः केशवमभिननन्द।(कूटसाक्ष्यकल्पनान्वितहुङ्कारेण निरस्य एवमवादीत् - ब्रह्माणमुद्दिश्य शिवः।)

अधिकारमदेन युवां अतिप्रसक्तौ। मम महिमानं विलोक्य विष्णुः विवेकमवाप। भवदहङ्कारात्मकं (शिक्षारूपेण) पञ्चममुखं प्रागेव मया खण्डितम्। तथापि मात्सर्यं न जहासि। तस्माल्लोके तव प्रतिमायाः केतक्या पूजार्हता न भवतु। एवं शप्त्वा विष्णुमुद्दिश्य प्रीत्या एव-मवोचत्।

पुत्र मा भैषीः। भवतो भक्त्या प्रसन्नोऽस्मि। भवान् मम वामभागादजायत सत्त्वगुणप्रधानो भवान् पुरा महेश्वरभक्ताग्रगण्यः इतः परमपि तथैव वर्तिष्यसे। भवद्भक्तिः, न कदापि क्षीयते प्रत्युत प्रतिक्षणं वृद्धिमवाप सैव मोक्षहेतुर्भविष्यति।

इत्थं विष्णुमनुगृह्णन्तं त्रिलोचनं वीक्ष्य ब्रह्मणोऽहङ्कारो ननाश। शिवमहिम्नस्तोत्रे लिङ्गमूर्तेरनन्तत्वमेवमुपवर्णितम्।

Indira Gandhi National Centre for the Arts & Kapila Vatsyayan Kapilakshmi Research Academy

तत्पैश्वर्यं यन्नाभ्यम्बुरुहादुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्धवपुषः।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥ (१०)

श्लोकोऽयममुं वृत्तान्तं प्रमाणयति।

किञ्च भयकम्पितः प्रणम्य परमशिवं बहुधाऽस्तौषीत् ब्रह्मा।

अनया गाथया ब्रह्मणः विष्णोश्च गर्वः शिवेन दूरीकृत इति स्फुटं ज्ञायते।

१०. विष्णोर्महत्त्वम्

स्कन्दपुराणस्य वैष्णवखण्डे ३५ अध्यायः।

यदा जगतो जलप्रलयस्सम्भवति, अर्थात् जलं विहाय न किञ्चित् दृश्यते, तदा श्रीमन्नारायणः बालकृष्णरूपेण जलस्य उपरितले वटपत्रस्योपरि शेते इति प्रायः सर्वेऽपि जानन्ति। कदाचित् नारायण एव रमया सह शेषतल्पशायी सन् योगनिद्रावशः शेते इति च। तदा तस्य नाभ्याः उत्पन्नात्कमलात् चतुर्मुखं भगवान् विष्णुः सृजतीति च श्रुणुमः। अयं भगवतो मुकुन्दस्य लीलाविशेषः। तस्यान्तर्यं न कोऽपि जानाति। जगति यदा धर्मस्य हानिः अधर्मस्य वृद्धिश्च भवति, यदा च सुरा क्लेशमग्नाः खिद्यन्ति असुराः वृद्धिं प्राप्नुवन्ति तदा भुवः भूतलवासिनाश्च, साधूनां रक्षणाय च कालानुरूपेणावतारेण विष्णुः अधर्मं नाशयित्वा धर्मं रक्षतीति विज्ञा अज्ञाश्च जानन्ति।

अयं विष्णुरेव रजोगुणमाश्रित्य ब्रह्मनामधेयेन विश्वं सृजति। स एव सत्त्वगुणमाश्रित्य विष्णुर्भूत्वा जगद्रक्षणं आचरति। तमोगुण-माश्रित्यच रुद्रो भूत्वा संहरति। महाविष्णोर्महिमानं ज्ञातुं को वा शक्नुयात् ?अमुमेव तत्त्वं बाणभट्टः कादम्बर्यां मङ्गलचरणे एवं प्रस्तौति।

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः इति।

In Public Domain. Digitized by eGangotri Siddhanta eGangotri Gyaan
ये भक्ता भोगिभिर्विषयैः तेषां विष्णुभक्तिरेव पोषिका। सज्जनाः विष्णुभक्तिरूपां मातरमाश्रित्य सन्तुष्टान्तरङ्गा भवन्ति। ते न कदापि खिद्यन्ते। विष्णुभक्तिनामकममृतं निपीय ये सन्तुष्टास्तेषां धन-कनकादिभिः किम्? किन्तु कतिपयानि प्रातिस्विकलक्षणानि भवन्ति।

११. वासुदेवभक्ताः

एते सर्वभूतेषु वासुदेवं पश्यन्ति। न कस्मिन्नपि जीवे दोषं गणयन्ति। सर्वदा दीनजनेषु दयां वहन्ति। परोपकारे महतीं श्रद्धां वहन्ति। कृष्णसर्पं दृष्ट्वा जनाः यथा बिभ्यति, तद्वदेते बाह्यविषयेभ्यो भीताः अविवेकिनः जगद्विषयेषु यावतीमासक्तिं वहन्ति, एते वासुदेवे तावतीं श्रद्धां वहन्ति, पितॄन् विष्णुरूपान् भावयन्ति। परेषां क्षेममात्मनः क्षेमत्वेन मन्यन्ते। पराभूतेषु कृपणेष्वनुकम्पया तेषां श्रेयसे कल्पन्ते एतादृशाः एव वासुदेवभक्ताः इति ज्ञातव्यम्। पूर्वोक्तप्रतिपादनेन ज्ञायते विष्णुभक्तिः सर्वोत्तमेति।

१२. पाशुपतस्य पराजयः

पुरा काशीनरेन्द्रः तीव्रं तपस्तप्त्वा शिवमानन्दयामास। तुष्टःशङ्करः तस्याभीप्सितं वरं ददौ, येन सङ्ग्रामे विष्णुर्जय्यो भविष्यति। किञ्च स्वयं प्रमथगणेन साकमागत्य सङ्ग्रामरङ्गे भवत्पक्षे योत्स्यामीति शङ्करः काशीशाय प्रतिजज्ञे। तच्छ्रुत्वा काशीराजः अतिवेलं जहर्ष।

दृप्तः काशीनरेन्द्रः शङ्खचक्रगदाधारिणं श्रीहरिं योद्धुमाजुहाव। सर्वान्तर्यामी श्रीमन्नारायणः काशीनरेन्द्रस्य दर्पहेतुं ज्ञात्वा तस्य वधाय चक्रं प्राहिणोत्। तच्चक्रं सहस्रशः सूर्यस्येव किरणानि प्रसारयत् प्रस्थाय प्रथमतः काशीराजस्य मस्तिष्कमच्छिनत्। ततस्तत्सैनिकान् हत्वा काशीपुरमपि ददाह। वृषारूढः पिनाकपाणिः चक्रायुधं प्रतिरोद्धुमैच्छत्, किन्तु तदतिभीषणं प्रत्यभात्। प्रतिकर्तुमशक्तो धूर्जटिः पाशुपतास्त्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization Muthulakshmi Research Academy
प्रायोजयत्। अस्तु तत्पाशुपतं कस्य वस्तु ? कदाचिद्विष्णुमुद्दिश्य शिवेन कृतस्य तपसः फलत्वेन प्रसन्नेन श्रीमन्नारायणेन प्रसादितं किल पाशुपतम्। तस्य वितरणसमये इत्थमवादीद्विष्णुः यदिदं पाशुपतं प्रलयेन तुल्यम्। अस्य प्रयोगावसरे यदि मां स्मरेत्तर्हि तदस्त्रं बलोपेतं करोमि, अन्यथा मां विरुद्ध्य प्रयुज्यते तर्हि निर्वीर्यमस्त्रं भविष्यति इति। विष्णोर्वचनमिदानीं शिवस्य स्मृतिपथमाययौ। विष्णुः शिवनिकेतनं वाराणसीमपि ददाह, तेन भयकम्पितो महादेवः पुरुषोत्तमं शतधा तुष्टाव। तद्यथा- हे परमात्मन् सच्चिदानन्दरूप! तुभ्यं नमः। मां तमोगुणप्रकृत्या भवानेव ससर्ज। न वेद्मि भवन्महिमानम्। शरणं गतोऽस्मि। ममापराधमविगणय्य मां परिपालयेति बहुधा प्रार्थयत। तदा शङ्खचक्रगदापद्मवनमालाविभूषितः श्रीमन्नारायणः साक्षात्कृत्य एवमवादीत्।

शङ्कर इयता कालेन ते इयती दुर्बुद्धिः कथं जाता ? कस्यचिन्नराधमस्य पक्षमवलम्ब्य मयैव योद्धुं प्रवृत्तः ? त्वदीयं पाशुपतं वस्तुतः सुरासुराणां दुर्जेयमेव। तन्मम क्रोधस्वरूपमवेहि। भवन्तमपि न क्षाम्यति तदस्त्रम् मामवगणय्य जगति त्वां विना न कोऽपि जीवति। ततश्शिवो विनम्रः इत्थं व्यजिज्ञपत्। स्वामिन् । भवान् शरणागतं रक्षति। भवदाज्ञानुपालनमेव मह्यं श्रेयःप्रदं भवति मूर्खतयाऽहं गर्वितः। इदानीं भवदादेशं शिरसानुमन्य मोक्षदायकं प्रदेशं प्रयास्यामि। इत्थं बहुधा सान्त्वयित्वा तं देवं तदनुमत्या स्वनिवासं जगाम परमशिवः।

उक्तवृत्तान्ते ज्ञातव्यं यत् शिवकेशवयोरायुधानि तयोः परस्परं प्रतिकूलतया न प्रवर्तन्त इति।

In Public domain. Digitization Muthulakshmi Research Academy

१३. शिवनिन्दकस्य निन्दा

स्कान्दपुराणस्थकाशीखण्डे सप्तमाध्यायः।

विष्णोर्वचनानि :-

वाराणस्यां बिन्दुतीर्थे स्नात्वा आदि (बिन्दु) माधव इति नाम्ना प्रख्यातं मां जनः पूजयेत्। कृतयुगे आदिमाधव इति, त्रेतायामनन्त-माधव इति, द्वापरे श्रीधरमाधव इति च व्यवहरन्तो मां ये पूजयन्ति, तेषाम् अभीष्टानि फलन्ति। कलियुगे बिन्धुमाधव इति नाम्ना ये मामाराधयन्ति तान् कलिकालसम्बन्धिनो दोषा न स्पृशन्ति। पापभूयिष्ठेऽस्मिन् कलियुगे प्रजाः मम महिमानं न जानन्ति। ममैव मायया मोहिताः भेदवादं कुर्वन्ति। मयि भक्तिं निधाय ये विश्वेश्वरं द्विषन्ति, ते मम विरोधिन इति जानथ। ते पिशाचयोनिषु जन्म प्राप्य कालभैरवस्याज्ञया द्वात्रिंशत्सहस्रवर्षाणि दुःखसागरे निमज्य अन्ते विश्वेश्वरकृपयैव मोक्षं लभेरन्। पुनः विष्णुरेवमुवाच।

ये विश्वेश्वरं मनसा द्विषन्ति ते मृताः अन्धतामिस्रनरकं विशन्ति।

ये शिवं पाशुपतं च निन्दन्ति ते मम शत्रवः। ते निरयं यान्ति। तत्र कोटिनिरयेषु एकैकशः प्रविश्य यातनान्यनुभूय कल्पकालं नयन्ति। विश्वेश्वरस्यानुग्रहेणैवाहं (बिन्दुमाधवः) मुक्तिं ददामि। मद्भक्तं वैष्णवाः प्रत्यहं विश्वेश्वरं ध्यायेरन्।

शिवस्य महिमानं यद्विष्णुरेव बहु मनुते, स एव विशेषः।

१४. विष्णवे शङ्करस्य वरदानम्

स्कान्दपुराणस्य काशीखण्डे ९८ तमाध्यायः।

एकदा शङ्करो मन्दरपर्वतादानन्दवनं गत्वा इतस्ततः सञ्चरति स्म। ततो मोक्षलक्ष्मीविलासस्थाने स्वभवने प्रविवेश। तं महेन्द्रादयो देवाः अपूजयन्। ततस्सर्वे महेश्वरं प्रणम्य स्वमनोरथान् विज्ञापयन्ति

In Public domain. Digitization Muthulakshmi Research Academy
स्म। महादेवः तेषामभीप्सितानि पूरयामास। पश्चात् ते महेन्द्रादयो - ब्रह्मणा सह विष्णोः समीपं ययुः।

ब्रह्मा विष्णुमेवं तुष्टाव-

मम सृजनशक्तेः भवानेव मूलम्। यद्यपि शरीरापेक्षया दूरे वर्तसे, तथापि क्रियया सन्निहित एव। कार्यनिर्वाहकाः त्वत्तोऽन्ये न सन्ति। ततः शङ्करः विष्णुमुद्दिश्य एवमवादीत्। विष्णो ! भवतः अभीप्सितं यत् किञ्चित् प्रष्टुमर्हति। न तदस्ति यद् भवते न देयम्। त्रिभुवने मया सम्प्राप्तस्यानन्दस्य हेतुर्भवानेव। इतोऽधिकं सुखं न किञ्चिदस्ति। विष्णुः शिवे प्रपन्नः एवमाह -

हे महेश्वर ! यदि भवान् मयि प्रसन्नः तर्हि भवतो दूरदेशे यथा न वत्स्यामि तथा वरं प्रसादय। ये भवन्तमादावनर्च्य मां पूजयेत् तस्य मनोरथं न सेत्स्यति।शङ्करः एवमाह। हे अच्युत ! मदीये मण्डपे ये वसेयुः ते सर्वसौख्यानि लभेरन्। तत्तुल्यं सौख्यं कैलासमहीधरेऽपि न वर्तते। पूर्वोक्तसंभाषणेन हरिहरयोः अविनाभावो ज्ञायते।

१५. ब्रह्माणं विष्णुं च रुद्रो ररक्ष। स्कान्दपुराणस्य अवन्तीखण्डे पूर्वार्धे ४८ अध्यायः।

महेश्वरः गौर्यै कथयति -

हिमगिरितनये ! प्रथमपाद्मकल्पावसाने सूर्यचन्द्रताराः भूर्भुवस्सुवर्लोकाश्च विलयं प्रापुः। पुनः सृष्टिः कथं भविष्यतीति चिन्तया ब्रह्मणो नेत्राभ्यां द्वौ जलबिन्दू गलितौ। तयोरेकः स्थूलः, स वामनेत्रात्पपात तस्मात् हारवाख्यः कश्चिद्राक्षसोऽजायत। स महाकायः अञ्जनगिरिवन्नीलदेहः निशितदीर्घदन्तस्सन् भीषणो बभूव। तस्य दक्षिणाक्षितः कालकेलिनामा राक्षसस्समभवत्। स नीलदेहः महोन्नतः दीर्घदन्तः, ऊर्ध्वरोमः दक्षिणकरे भीषणं खड्गं वामकरे पाशं च धृत्वा यमराडिव भीषण आसीत्। तावुभौ कृतसङ्केतौ ब्रह्माणं हन्तुं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri
समुद्यतावास्ताम्। ब्रह्मा द्विहमलसन् अभावत्। स समधे जले महौजसं कञ्चित्पुरुषं शङ्खचक्रगदाहस्तं पीताम्बरधरं दृष्ट्वा विष्णुरिति तं प्रत्यभिजानात्। स एवमाह यदहमेव अस्य जगतः स्रष्टा रक्षकस्संहर्ता चेति। ब्रह्मा जगाद- यदहमेवास्य जगतस्स्रष्टा देव-दानव-मानवात्मकं निखिलं जगदहमेवासृजमित्युवाच। एवं वदतोरुभयोः बलदर्पितौ तौ राक्षसौ बुभुक्षार्दितौ ब्रह्माणं हन्तुमुद्यतावाजग्मतुः। तदा कमलनयनं श्रीकृष्णमुद्वीक्ष्य ब्रह्मा एवमाह। अयि! त्वं जगत्कर्तेत्यब्रवीः तद्यदि सत्यं तर्हि भीषणाविमावसुरौ मारयेति। इदानीमनयोः क्लेशो भवेत् इति विज्ञाय विष्णुः क्षणकालं विश्रामो भवतु पश्चात् द्वन्द्वयुद्धं कुर्व इत्यवोचत्। दैत्यौ तथैवेति कञ्चित्कालं विश्रेमतुः। पश्चात् योद्धुमुपचक्रमतुः। तौ रणे अजय्याविति वृषाकपी बिभ्यतुः। उभयोः स्वेदोऽजनि। ब्रह्मणः कम्पःप्रावर्तत इदानीं देशकालानुरूपेण किं कर्तव्यमिति-मतिमकार्षीत्। आत्मनो मरणकाल आसन्न इति मत्वा ब्रह्मा जगाद। केशव अनतिदूरे महाकालाख्यमरण्यमस्ति। तत् जगत्प्रलयेऽपि न नश्यति। तत्रावयोस्त्राणं लभेत। अहं तत्र प्रयामि भवानप्यागच्छतु इत्यवोचत्। अग्रे ब्रह्मा पश्चाद्विष्णुश्च महाकालवनं प्राविशताम्। किन्तु तत्र महादेवो नादृश्यत। तदर्थं अयुतवर्षाणि अन्विष्यापि तौ माहदेवं नावाप्नुताम्। ततो ज्वालामयं लिङ्गं साक्षाद्बभूव। ब्रह्मा विष्णुश्च तत् दृष्ट्वा स्वामिन् इमौ दानवौ आवां पीडयतः। आवयोरभयं देहीति प्रार्थयामासतुः। तेजोलिङ्गं गगनवाण्या अभयं ददौ। एवं स्थिते तयोर्दानवयोर्गर्जनं चतुर्मुखः अश्रौषीत्। तदाकर्ण्य मृत्युः सन्निहित इति विभाव्य आवयोः, अभयं देहि इति तौ तेजोलिङ्गं प्रार्थयामासतुः। लिङ्गं तयोरार्तनादमाकर्ण्य तौ स्वकुक्षौ न्यक्षिपत्। तयोस्तत्र सूर्यचन्द्रग्रहसमेतं सशैलकाननं ससुरासुरसिद्धगन्धर्वसञ्चारसमेतं सर्वं जगददृश्यत। तद्वीक्ष्य तौ विस्मितौ। उभौ बहिरागत्य तयोरसुरयोर्भस्मराशी ददृशातौ।

In Public domain. Digitized by eGangotri and Sarayu Lakshmi Research Academy
तयोरात्मन्यधिरोप्य नाभितः सौम्यसम्पन्नं तेजोलिङ्गमस्तौष्टाम्। लिङ्गमूर्तिः प्रसन्ना बभूव। अत्यन्तदुर्लभमिदं तेजोलिङ्गं युवयोस्साक्षाद्विरराज। भवदभीप्सितं प्रार्थयेताम् इति लिङ्गमन्वग्रहीत्। तावित्थं प्रत्यवोचताम्, भगवन् सर्वेषां नराणामभयं प्रसादय। ये वा भवन्तं भजन्ते समाहितचित्ता ध्यायन्ति स्मरन्ति च तेभ्यः अभयं प्रदेहि इदमेवावयोरभीप्सितं वरम्। इतः परमिदं तेजोलिङ्गमभयेश्वर इति ख्यातिं लप्स्यते। ये भवन्तं भक्त्या पश्यन्ति तेषां पुत्रमित्रकलत्रादीनां वियोगो न भवति दुर्भगा यदि भवन्तं सेवेत सौभाग्यं भजेत, या कन्या भवन्तमराधयति सा वीरपतिं प्राप्स्यति। प्रजाः यया वाञ्छया भवद्दर्शनं कुर्युः तेषां सा वाञ्छा फलति, इमानि वाक्यानि श्रुत्वा ब्रह्मा विष्णुश्च स्वस्थानं ययतुः।

अनया गाथया शिवः ब्रह्माणं विष्णुं च ररक्षेति विज्ञायते।

१६. सुदर्शनस्य वैफल्यम्

आदिकल्पे सृष्ट्यनन्तरं ब्रह्मा लोकानुग्रहमुद्दिश्य यदा चिन्तितवान् कल्पवृक्षाः उत्पन्नाः तदा तैस्सह बिल्ववृक्षा अपि उदभवन्। बिल्वस्य श्रीवृक्ष इति नामान्तरमस्ति। तस्याधस्तादेको नर उपविष्ट आसीत्। तस्य शरीरात् सौवर्णकान्तयः प्रसरन्ति स्म। वृक्षात् पतितानि विल्वफलानि पत्राणि किसलयानि च भक्षयन् स नरः नितरां तृप्यति स्म। स नरः धनुर्बाणान् अङ्गुलीषु गोधाचर्मापि दधार। तं दृष्ट्वा उत्कण्ठितो ब्रह्मा तस्य नामधेयं बिल्व इति प्राकटयत्।

सुरेन्द्रस्तं दृष्ट्वा प्रहृष्य त्वं भूलोकस्य प्रभुर्भव, अहं स्वर्लोकराज्यं पालयामीत्यवोचत्। इत आरम्भ आवां सुहृदौ भवावः। तुभ्यं स्वर्लोकस्थितां वैजयन्तीं ददामि। तन्मालाग्रथितानि कुसुमानि न कदापि म्लायन्ते। तत्प्रभावेन युद्धे किमप्यायुधं त्वां न हिनस्ति।

तच्छ्रुत्वा बिल्वो वदति- स्वामिन्! यदि मया योद्धव्यं तर्हि

In Public domain. Digitization Muthulakshmi Research Academy
भवता वज्रायुधमवश्यं दातव्यम्। नोचेत् युद्धं न करिष्यामि। यदि दास्यसि तर्हि भुवं पालयामि, तदाकर्ण्य भवतु शुभं ते भूयादित्युक्त्वा त्वं प्रजाहितः प्रभुर्भव। यदा त्वं वज्रं स्मरिष्यसि तदैव तत् भवत्करं प्राप्स्यति इत्युक्त्वा इन्द्रो जगाम। बिल्वः राजा बभूव। तत्र कपिलो नाम वेदवेदाङ्गपारगः कश्चिद्विप्र आसीत्। धार्मिकस्स भूसुरः बिल्वस्य सुहृद्भूव। उभावपि इष्टकथाप्रसङ्गेन सुखेन कालमतिवाहयतः।

कदाचित्तयोः कस्मिंश्चिद्विषये विवादस्संवृत्तः। तथाहि दानं प्रधानमिति विप्रः, तीर्थं प्रधानमिति राजा च विवदमानौ आस्ताम्। वेदो महान्, तपो महदिति कपिलः, दानमेव सर्वोत्तमं दानेन राज्यं सुखं भोगः ऐश्वर्यं शाश्वतस्वर्गवासश्च प्राप्यन्ते, एवं स्थिते हे विप्र कुतो वेदं प्रशंससे इति बिल्वोऽवदत्।

कपिलो वदति। अयि भोः विप्रप्रवर वेदैः यज्ञाः प्रवर्तन्ते। इष्टयः काम्यकर्माण्यपि वेदमूलान्येव। किं बहुना! जगतो वेद एव मूलमवेहि।

बिल्वो ब्रवीति- जगति पार्थिवाः उत्तमाः, ते जगतः पालने दक्षाः भवन्ति। ते लोकपालैस्तुल्या भवन्ति। एवं स्थिते त्वं कथंकारं वेदं स्तौषि।

कपिलः - विप्राः शापानुग्रहसमर्थाः। ते राज्ञां पितृसमानाः इति त्वमङ्गीकरोषि?

इत्थं तयोर्विवादो ववृधे। बिल्वः कोपोद्रेकेण वज्रं सस्मार। अनुपदं हस्तगतेन वज्रेण कपिलस्य शिरो बभञ्ज। द्वेधाभग्नं तच्छिरः पुनः ब्रह्मविद्यया सन्धाय इन्द्रमुपगम्य तं बहुधा तुष्टाव। इन्द्रः प्रसन्नस्सन् कपिलस्य यथा हानिः न भवेत् तथा अनुजग्राह।

कपिलः पुनर्बिल्वमुपजगाम। तयोस्सख्यं यथापूर्वमासीत्। एवं स्थिते कतिपयदिनानन्तरं वाग्वादः पुनर्बभूव। तदा पुनः बिल्वःविवाद-वशात् कपिलं वामपादेन संताड्य वज्रेण जघान। तेन

In Public domain. Digitization Muthulakshmi Research Academy
ब्राह्मणस्य न कापि बाधा समुजनि। तस्य तपोभङ्गे हानिर्नास्तीति ज्ञात्वा बिल्वः श्रीमन्नारायणमुपगम्य तं बहुविधमस्तौषीत्। प्रसन्नश्श्रीमन्नारायणः मनोरथं ब्रूहीति बिल्वमपृच्छत्। बिल्वो वदति स्वामिन् देवदैत्य-पिशाचयक्षगन्धर्वेषु कस्मादपि अहं न बिभेमि। केवलं कपिलाभिधान-विप्रादेव बिभेमि तद्भयमपाकर्तुं प्रार्थयामीत्युवाच। ततो विष्णुः कपिलस्याश्रमं जगाम। तमाहूय जनार्दनस्सविनयमेवमवोचत्। भवन्तमहमेकं वरं प्रार्थयितुमुपागमम् अनुगृह्णस्व। बिल्वो नाम पृथिवीपतिः मां बहुधा अस्तौषीत्। तेन तुष्टोऽहं वरं वृणीहीत्यवदम्। सः कपिलादात्मनो निर्भयत्वं वव्रे। तथैवाहं कपिलात्तस्य निर्भयत्वमनुगृहीतवान्। त्वमपि एवमेव तं प्रति कथयेत्याह। तथाहं न कथयामीति कपिलः प्रत्युवाच। तदा विष्णुः आत्मनः सुदर्शनं दर्शयित्वा अनेन त्वां प्रहरामीत्यवदत्।

कपिलो वदति भगवन् भवत्सुदर्शनस्य कुतः श्रमं कल्पयामि? शिवानुग्रहेणाहं चक्रेण अवध्योऽस्मि, इत्युक्त्वा मुष्टिमेयदर्भान् गृहीत्वा तिष्ठ तिष्ठ तव गर्वमपनेष्यामि। त्वयि या महाद्भुता शक्तिरस्ति तां ध्वंसयिष्यामीत्यवोचत्। तदा विष्णुना प्रयुक्तानां दिव्यास्त्राणां कपिलप्रयुक्तकुशानां विहायसि महान् सङ्ग्रामः प्रावर्तत। सुराः बिभ्युः। चतुराननो नितरां सन्तप्तः सुरसंघेन सह तत्र ययौ। तत्र सः विष्णुमेवमब्रवीत्। नारायणः भवान् भूतभविष्यतोरधिपतिः। सर्वेषां भवबन्धान् मोचयितुं प्रभवसि। जगतः सृष्टिस्थितिलयानां विधाता महात्माऽसि। इन्द्रादयस्सुरा भवन्तमाराध्य सौख्यं लभन्ते। ब्रह्मादिस्तम्बपर्यन्तं भवानेवोत्पादयति। भवतः विशुद्धं स्वरूपमेव सर्वतो व्याप्य वर्तते। हे गुरुडध्वज ! अभीष्टार्थिनो देवदानवसिद्धचारणपन्नगादयो भवन्तमाराध्य कृतार्था भवन्ति। तथाविधो भवानेव केनचिद्विप्रोत्तमेन सह कस्माद्योद्धुमुपाक्रमत। शिवानुग्रहेण

In Public domain. Digitization Muthulakshmi Research Academy
कपिलस्य अवध्यत्वं लब्धमिति किं न वेत्ति भवान्। भवादृशाः देवान् विप्रांश्च न द्विषन्ति। कदाचिद्भवानेवैवमवादीद्यद्वेदो विप्राणां सृष्टिमूलमिति। अतो भवान् विप्रं प्रत्यायोधनं सपद्युपसंहरतु।

ब्रह्मणो वाक्यानि श्रुत्वा विष्णुः कपिलस्य शक्तिं विज्ञाय शङ्करमुपजगाम। तथा आगतं हरिं दृष्ट्वा बिल्वः उच्चैररोदीत्। हरि-कपिलयोर्दारुणं सङ्ग्रामं विज्ञाय कथमहं कपिलं जेष्यामि? कमहं शरणं प्रयामि। मां को वा परित्रास्यति ? यदि जगद्रक्षकः विष्णुरेव जयिष्णुर्न भवति तर्हि मम का गतिः ? यः प्रत्यहं स्पर्धते तमहं कथं जेष्यामि ? शापानुग्रहपटवो विप्राः दुर्जेयाः खलु। ते सुरासुरनरसङ्गसमेतं जगद् - भस्मीकर्तुं प्रभवन्ति। इदं देवैरपि दुर्लङ्घम्। इत्थं विलपति बिल्वे देवेन्द्र उपागमत्।

वज्रहस्तोऽपि कृशीभूय विलपन्तं बिल्वमुद्वीक्ष्य प्रवृद्धानुकम्पः एवमवादीत्। हे बिल्वभूपते ! माशुचः मम वाचमाकर्णय। कदाचिद्बल-गर्वितेन शम्बरासुरेण पीडितोऽहं किं कर्तव्यमिति सुरगुरुमप्राक्षम्। स एवमाह पुरन्दर यदि क्लेशमपाकर्तुमिच्छसि। ममाज्ञया शुभदायकं महाकालवनं प्रयाहि। तत्र विविधानि दिव्यानि शिवलिङ्गानि सन्ति ! सर्वाण्यपि तानि भक्तेभ्यः भुक्तिं मुक्तिञ्चानुगृह्णन्ति। तेषामेकं लिङ्गमाराधय। तस्य दर्शनमात्रेण युद्धे त्वमजय्यो भविष्यसि। तस्योपदेशमनुसृत्य पुराहं तत्रान्यतमं लिङ्गं तदेकनिष्ठयाऽऽनर्च। पश्चात् शम्बरासुरमजैषम्। ततः प्रभृति तल्लिङ्गस्य इन्द्रेश्वर इति ख्यातिरजनि। ततस्त्वं तत्क्षेत्रस्य पश्चिमदिशां प्रस्थाय वरुणपूजितं शिवलिङ्गमाराधय। भवदाराधितं सत् तत् बिल्वेश्वर इति प्रसिद्धि-मेष्यति। भवन्मित्रं जितोऽस्मीति कपिलः वक्ष्यति। तन्महिम्ना सः पुनस्त्वया मैत्रं भजते। एवमुक्त्वा सुरपतिर्निरगात्। बिल्वनरेन्द्रः महाकालवनं प्राविशत्। तत्र पश्चिमदिशि सुरैराराधितां लिङ्गमूर्तिं मुक्तारत्नविभूषणैर्महता विभवेन समानर्च। तत्रान्तरे कपिलस्तत्रायया।

In Public domain. Digitized by Muthulakshmi Research Academy
बिल्वभूपालः महालिङ्गं महर्मुहुरुपासांचक्रे स्म। एकाग्रतया लिङ्गार्चनमाचरतः बिल्वस्य शरीरे कपिलःआत्मनो रूपं ददर्श। सः बिल्वं महादेवत्वेन भावयामास। बिल्वमाहूय जितोऽस्मीति कथयन् , हे बिल्वनरेन्द्र ! सदा तव सख्यं प्रार्थयामीत्यवोचत्। बिल्वः कपिलं दृष्ट्वा अतितरां प्रसन्नो भूत्वा कृताञ्जलिरुवाच। हे कपिल धन्योऽस्मि। महात्मना भवता सह स्नेहात् किमन्यत् स्पृहणीयं विद्यते। अथ उभावपि प्रेमरसार्द्रौ पूर्ववत्सख्यमवलम्ब्य चिरमूषतुःतन्महालिङ्गमहिम्ना बिल्वभूपतिः प्रियसुहृदस्सहयोगेन राज्यं चिरं पर्यपालयत्। तदारभ्य तल्लिङ्गं बिल्वेश्वर इति प्रख्यातम्।

उक्तया गाथया नारायणमहेश्वरयोः महिमानौ काले काले निरूपिताविति ज्ञायते।

१७. शिवकेशवयोरभेदप्रतिपादनस्य प्रमाणानि

विष्णुसहस्रनाम्नां शङ्करभाष्ये नाममहिमा इत्थं वर्णितः।

संसारसर्पदंशनाद्ये निश्चेष्टा भवन्ति ते कृष्णेति विष्णुनामश्रवणात् मुक्ता भवन्ति। सर्वाणि शास्त्राणि मथित्वा बहुधा परिशीलनेन इदमेकमेव विज्ञायते यन्नारायणः सदा ध्यातव्य इति।

यथा अग्नेःप्रशमनाय जलं तमसो निवारणाय सूर्योदयः एकमेव कारणं तथा कलिकालजन्यपापानामपाकरणे नामसङ्कीर्तनमेकमेव साधनम्। तदकृत्वा क्षणव्ययेऽपि अस्माभिर्मन्तव्यं यदस्मद्धनं चोरैरपहृतम् । विष्णवे समर्पितः, एको नमस्कारोऽपि दशाश्वमेधानां फलं प्रयच्छति, कदाचिद्दशाश्वमेधयाजिनः पुनर्जन्म भवेदपि न तु कृष्णप्रणामिनः। इत्थं विष्णुनाम्नः महोत्कृष्टता प्रत्यपादि।

१८. महेश्वरस्य वचनानि

भविष्यपुराणम्

मां ब्रह्माणं वा विष्णोरन्यत्वेन ये मन्वते ते दुर्मतयः मूढाश्च

In Public Domain. Digitized by eGangotri Siddhanta eGangotri Research Academy
भवन्ति। ते मृताः नरकमिवशन्ति। ये पुनरात्मान मर्वाश्च मां ब्रह्माणं च विष्णोर्भिन्नतया मन्यन्ते, तेषां यत् पापं तत् ब्रह्महत्यया सदृशं भवति।

१९. शिवकेशवयोरभेदः

विष्णुमुद्दिश्य महेश्वरस्य वचनानि। देव ! त्वमहं च सर्वव्यापकौ स्वः। जनार्दन त्वमेवाहम् , आवयोर्भेदो नास्ति। यानि तव नामानि लोके प्रसिद्धानि तान्येव मम नामानि। अस्मिन् विषये नामसु अर्थेषु वा न भेदलेशोऽस्ति। अस्मिन् विषये विमर्शः न सङ्गच्छते। भवन्तमुद्दिश्य या उपासना क्रियते सा मामप्यन्वेति भवन्तं यो द्वेष्टि सः ममापि रिपुरेव।

२०. महाभारतेतिहासः

यो विष्णोरन्यो भवति सः विष्णुं न कीर्तयेत्। नाप्यर्चयेत्। न च स्मरेत्। विष्णोरन्यः विष्णुं न प्राप्नोति इति महाभारतमुपदिशति। अर्थात् पूज्यपूजकयोरेकत्वभावना आवश्यकीति भावः। नारुद्रो रुद्रमर्चयेदिति वाक्ये रुद्राद् भिन्नः रुद्रं नार्चयेदिति ज्ञायते। अर्चनापरः देवतायाः आत्मनश्च एकत्वं भावयेदितिभावः। रुद्राभिषेकस्य पूर्वाङ्गतया पठ्यमानो महान्यासः आत्मनः सर्वावयवानां रुद्रावयवैरभेदं भावयति। अर्चनाविधाने शिवकेशवयोर्भिन्नाचारः न विद्यत इति ज्ञेयम्।

२१. विष्णुधर्मोत्तरपुराणम्

सर्वात्मकमेकं ब्रह्मैव बहुभिर्नामभिर्लोकोपकाराय कथितम्। नाम्नःप्रत्येकं प्रवृत्तिनिमित्ता शक्तिरस्ति कथमिति चेत् चक्रवान् चक्रीति, शूलवान् शूलीति, गदावान् गदीति इमा निमित्तशक्तयः। पूजकस्य रिपून् तत्तदायुधैः हन्युरित्याशयः एकस्यैव देवस्य तदीयायुध-सम्बन्धेन भिन्नभिन्ननामानि सन्ति यथा शङ्खी, चक्री, गदी, नन्द-कीत्यादीनि दृश्यन्ते।

In Public domain. Digitization Muthulakshmi Research Academy

२२. प्रह्लादवाक्यानि

पितृदेव! सर्वभूतात्मकं जगन्नाथं गोविन्दं मित्रमिति शत्रुरिति वा चिन्तनमविवेकः। मूर्खा अविवेकिनः अशूराः नीतिदूरा अपि राज्यं भोगभाग्यानि च अनुभवन्ति।अतःये सम्पदं अर्थयन्ति तैः पुण्यकार्याणि अवश्यं कर्तव्यानि। यः मुक्तिमिच्छति सः सर्वत्र समतादर्शनाय प्रयतेत। देवा मानवाः पशवः पक्षिणः वृक्षाः सरीसृपास्तथान्येऽपि भिन्नभिन्न-रूपैः दृश्यमानास्सर्वे जीवाः अनन्तस्य विष्णुभगवतो रूपाण्येव। तानि भिन्नभिन्नत्वेन दृश्यन्ते। यः एवं जानाति, सः स्थावरजङ्गमात्मकं जगत् स्वात्मतया पश्येत्। कुतः? यतो विष्णुर्विश्वरूपधरः । यदा एवं जानाति तदा अनादिरनन्तः परमेश्वरः प्रसन्नो भवति। क्षीयन्तेऽस्य सर्वे क्लेशाः।

सारांशः - देवानां नामानि भिन्नभिन्नार्थयोजनाय कल्पितानि, न तु देवानां भिन्नत्वनिरूंपणाय।

२३. शिवकेशवयोरैकमत्यम्

स्कान्दपुराणे माहेश्वरखण्डम्

दक्षयज्ञविध्वंसनाय यदा रुद्र आजगाम तदा दक्षः विष्णुमाह- स्वामिन्! भवन्तः यज्ञरक्षणपटवो देवाः। हे माधव ! वेदमूलस्य धर्मस्य रक्षकाः भवन्त एव। अत इमं यज्ञं रक्षन्तु।

तस्य प्रार्थनामाकर्ण्य विष्णुरित्थमवोचत्। हे दक्ष यज्ञस्य रक्षणं ममैव धर्मः,धर्मरक्षणमपि ममैव कार्यम्। अत्र धर्मस्य व्यतिरेक-स्समजनि। नैमिशक्षेत्रे स्थितो रुद्रः किं तव स्मृतिपथं नारुढः? महौजसं यज्ञस्वरूपिणं सदाशिवं त्वं यज्ञबाह्यमकरोः किल। अतः रुद्रकोपस्य लक्षीकृतं त्वां को वा रक्षेत् ? भवादृशं दुर्मतिं नाहमद्राक्षम्। किं कर्तव्यं किं वा न कर्तव्यमिति न ज्ञायते तव अतः मूर्खोऽसि। शिवरहितं कर्म न फलति। कर्मफलदाता ईश्वरादन्यो नास्ति । यः ईश्वरमुपेक्षते सः कोटियज्ञान् करोतु, तथापि स निरयमेव प्रविशेत्।

अस्मिन् वृत्ते विष्णुः यज्ञेषु शिवस्य प्राधान्यं जगाद।

In Public domain. Digitization - Muthulakshmi Research Academy

२४. विष्णोः प्रामुख्यम्

स्कान्दपुराणे वैष्णवखण्डः

चराचरात्मकं कृत्स्नं जगत् विष्णोर्वशे वर्तते। सः न कस्यापि वशे तिष्ठति। अनादिरनन्तः स परमात्मा भक्तानां वशे एव वर्तते। स एकोऽपि स्वमायया बहुरूपो दृश्यते। तं परमात्मानं विहाय नान्यः सुखप्रदोऽस्ति जीवानाम्। यदि शिवदुर्गादीन् देवान् भजामः, ते अभीष्टाननुगृह्णन्ति तेऽपि विष्णुभक्तिपरायणा एव। अत्र विष्णोः प्रामुख्यमभिहितम्

२५. मन्त्राणां समत्वम्

मुनयोऽपि भवन्तु यें नमो नारायणेत्यष्टाक्षरमन्त्रं ये न जपन्ति न स्मरन्ति, श्रीरामचन्द्रस्य (रां रामाय नमः इति) षडक्षरीं ये न जपन्ति न श्रुण्वन्ति न स्मरन्ति तेषां पापजातं रामस्तुतौ स्नानाचरणेन नश्यति।

ये ब्राह्मणाः शिवं केशवं वा अन्यदेवं वा वेदोक्तविधानेन नार्चयन्ति तेषां पापानि सेतुबन्धस्नानेन नश्यन्ति।

अयं विषयः सेतुबन्धस्नानस्य महत्त्वं प्रतिपादयन् शिवकेशव-मन्त्रयोः तुल्यत्वं बोधयति।

२६. शिवलिङ्गसालग्रामयोः समानत्वम्

स्कान्दपुराणस्य ब्रह्मखण्डे २८ अध्यायः।

लिङ्गाकारेण स्थितस्य शिवस्य सालग्रामरूपधारिणः विष्णोश्च भक्त्या आराधयतः दुःखं निरययातना वा न भवति। आषाढ-श्रावण भाद्रपदाश्वयुजमासेषु शिवकेशवयोर्विशिष्य पूजां कुर्वाणानां स्वर्गः ततो मोक्षश्च भवति। अत्र शिवकेशवयोस्तुल्यता निरूपिता।

२७. दक्षाध्वरवृत्तान्तः

दक्षाध्वरविध्वंसनाय समागतं वीरभद्रमुद्दिश्य वासुदेवः आत्मनः कौमोदकाभिधां गदां प्रायोजयत् वीरभद्रः गदाहस्तं गदाधरं

In Public domain. Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
खट्वाङ्गेन प्राहरत्। ततश्चक्री सुदर्शनचक्रं प्रयुयोज। सुदर्शनं दृष्ट्वा वीरभद्रः शङ्करं सस्मार। अनुपदमेव सुदर्शनः किञ्चिद् वक्रीभूय वीरभद्रस्य कण्ठाभरणमिव परिणम्य सुदर्शनमन्वर्थं चकार। तं दृष्ट्वा दरं हासं च यावदाचरति वीरभद्रः तावन्नन्दकाख्यं खड्गं जग्राह विष्णुः । तथा आपतन्तं विष्णुं सिद्धचारणेषु पश्यत्सु वीरभद्रः हुङ्कारेण स्तम्भयित्वा त्रिशूलं गृहीत्वा हन्तुमुदयुङ्क्त। सपदि साहसं मा कुरु इति नभसः गम्भीरनादो निस्ससार। तं श्रुत्वा वीरभद्रः दक्षमुपजगाम। धिक् ! शिवनिन्दकं इति तद्वक्त्रं खण्डशः अच्छिनत्। उक्तवृत्तान्तेन ज्ञायते यत् केशवस्यायुधानि शिवस्यायुधेभ्यः न्यूनतां गतानीति।

२८. शिवस्य आधिक्यम्

स्कन्दपुराणे काशीखण्डे ९५ अध्यायः व्यासवाक्यानि-

केशवमुपेक्ष्य ये मन्दमतयः अन्यदेवं भजन्ते ते संसारगहने मुहुर्मुहुः प्रविशन्ति। परात्परः एक एव, सःहृषीकेशः। तं यजमानः त्रिलोक्यापि आराध्यो भवति। विष्णुरेक एव पूज्य पुण्यप्रदश्च कामितार्थानां प्रदाता स एक एव। मोक्षमपि स एव ददाति। तादृशं श्रीमन्नारायणं विहाय योऽन्यमाराधयति तं वेदविद्यारहितं विप्रमिव सज्जनाः बहिष्कुर्वन्ति।

इत्थं वदतो व्यासस्य वचनानि श्रुत्वा नैमिशारण्यवासिनो ऋषय एवमुचुः।

हे पराशर ! भवान् वेदव्यासः, वेदानां विभागं कृतवान्। निखिलानि पुराणान्यरचयत्। तेषु धर्मार्थकाममोक्षाः व्यवस्थिताः। कदाचिदानन्दवने भवान् तर्जनीं दर्शयित्वा यां प्रतिज्ञामकरोत्, अपि तां स्मरसि ? हे व्यासभगवन् ! भवान् महादेवस्य नित्यनिवासपुरीं वारणासीं प्रयातु। तत्र युगधर्मा न भवन्ति। सा नगरी पृथिवीमाश्रित्य न तिष्ठति।

In Public domain. Digitization Muthulakshmi Research Academy
तद्वचनानि श्रुत्वा व्यासः किञ्चिदिवान्तश्चुकोप। सपदि अयुतशिष्यैस्सह वारणासीं प्रययौ। तत्र पञ्चनदहदे स्नात्वा माधवमानर्च। पादतीर्थे स्नात्वा आदिकेशवं ददर्श। तत्र पञ्चदिनान्युवास। तं वैष्णवा अभ्यनन्दयन्। ततः "जय विष्णो हृषीकेश गोविन्द मधुसूधन अच्युतानन्त वैकुण्ठ माधवोपेन्द्र केशव "। इत्थमवादीत्। हे व्यास ! त्वमकार्यमकारोः भवतो दुराचारेण मां महती भीतिरावृता। भगवान्नाम विश्वेश्वर एक एव नान्योऽस्ति तस्यैव करुणया मह्यं सुदर्शनं लक्ष्मीश्च प्राप्ते। स शिव एव त्रैलोक्यरक्षणशक्तिं मह्यं प्रससाद। तस्मिन् भक्तिवशादेव मम महैश्वर्यं लब्धम्। यदि त्वं सुखमिच्छसि, तर्हि तमेव महादेवमाराधय। अद्याचरितमकार्यं इतः परं मा कुरु। एतच्छ्रुत्वा व्यासः मौनेन पुरःस्थितं नन्दीश्वरं तर्जन्या दर्शयित्वा मम भुजस्तम्भकारी स एवेत्यसूचयत्। तद्भयादेव मम वाक्स्तम्भनमप्यभूत्। कृपया मम कण्ठं करतलेन स्पृश। भवानीपतिं स्तोतुं मम शक्तिरुदियात्। तत्प्रार्थनानुसारेण हरिस्तत्कण्ठं स्पृष्ट्वा यथागतं गुप्तं निरगात्। ततस्सात्यवतेयः वाक् स्तम्भविमोचनेन महेश्वरं स्तोतुमुपचक्रमे।

यं वै वेदो वेद नो नैव विष्णुः
नो वा वेधा नो मनो नैव वाणी।
तं देवेशं मादृशः कोऽल्पमेधाः
याथात्म्याद्वै वेत्त्यहो विश्वनाथम्।।
नान्यं देवं वेद्म्यहं श्रीमहेशात्
नान्यं देवं वेद्म्यहं शम्भोर् ऋतेऽहम्।
नान्यं देवं वा नमामि त्रिनेत्रात्
सत्यं सत्यं सत्यमेतन्मृषा न॥ ९५ - ४०-६३

व्यासमहर्षिः शिवं यावत्स्तौति तावदेव नन्दीश्वरः हस्तस्तम्भनं निवार्य

तत्र स्थितान् विप्रान् प्रणम्य एवमाह ः
In Public domain. Digitization Muthulakshmi Research Academy

हे व्यासभगवान् भवत्कृता शिवस्तुतिः नितरां पुण्यदायिनी इमां स्तुतिं ये पठन्ति, तेषु प्रसन्नो महाशिवः तदभीप्सितं ददाति। तदारभ्य पराशरात्मजः शिवभक्तिपरायणो बभूव। व्यासः घण्टाकर्णह्रदसमीपे शिवलिङ्गप्रतिष्ठामकरोत्। तत् व्यासेश्वरनाम्ना प्रसिद्धम्। व्यासः प्रत्यहं भस्मलिप्तः रुद्राक्षभूषणस्सन् रुद्रसूक्तं पठन् व्यासेश्वरमाराधयति स्म। तत्प्रभृति काशीनिवासिनां व्यासेश्वरः दर्शनीयो बभूव। अस्मिन् वृत्तान्ते शिवकेशवयोः परस्परादरः बोधितः। अष्टादशपुराणानां रचयितुः व्यासस्यैव शिक्षणं निगदितम्। शिवनामान्येव विष्णुवाचकानि दृश्यन्ते। स्कन्दपुराणस्य अवन्तिखण्डे ७४ तमेऽध्याये विष्णुसहस्रनामानि विलसन्ति। तत्राधो निर्दिष्टानि नामानि दृश्यन्ते।

नीलकण्ठो वृषो रुद्रो फालचन्द्रो ह्युमापतिः।
शिवश्शान्तो वशी वीरो ध्यानी मानी च मानदः।।

श्मशानवासी शिवःमांसाशी दुष्टनाशी परान्तकृत् योगिनीत्रासको योगी ध्यानस्थो ध्यानवासनः। उक्तनामानि शिवपरत्वेन प्रसिद्धिं गतानि। तेषु नीलकण्ठः रुद्रः उमापतिः स्मशानवासीति नामानि विष्णुपराणि भवन्ति किम् ? तस्मादिमानि नामानि शिवरूपेण स्थितं केशवं बोधयन्ति इति ग्रहणीयम्। एवं विष्णुनामसु लिखितानि वनमाली गदी शार्ङ्गी इत्यादि पदान्यपि विष्णुरूपेण स्थितं शिवमभिदधते इति मन्तव्यम्। उभयोस्समानि नामानि समं रूपं च यद्यपि विद्यते, तथापि शिवलिङ्गे विष्णुपूजनं, शालिग्रामे शिवपूजनं च कर्तव्यम्।

मानवाः यस्य कस्यापि पूजनं कुर्वन्तु तेषामन्यदेवतासु द्वेषः न्यूनत्वभावना वा न कार्या।

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मवैवर्तस्य तृतीयखण्डे २४ तमाध्यायः

भगवतो नारायणस्य वाक्यानि।

विश्वेश्वरः जगत्यां सर्वक्षेत्रेषु आसक्तिमुज्झित्य काश्यां निवासं प्रार्थयत्। इदमेव शास्त्राभिमतम्। अयमेव गुरुबोधः। मानवाः अनायासेन लब्धां सम्पदं अधिकफललाभाय अत्र वितरन्ति। अस्मिन् क्षेत्रे धर्मद्रोही दुस्सहः यः आत्मसम्बन्धिनामभावात् एकाकी भवति स तदीयं धनं यदि विश्वेश्वराय समर्पयति सः काशीक्षेत्रनिवासफलं लभते इति। नारायणेन बोधनमिदं श्रुत्वा सदाशिवः काशीमनपहायान्नपूर्णया सह वसति स्म।

३०. काशीपुरी विष्णुहृदयादुत्पन्ना - ब्रह्मवैवर्तपुराणे तृतीयखण्डे द्वितीयाध्यायः।

पुरा वराहकल्पे कदाचिदकस्मात् जले निमग्ना पातालं प्रविवेश।ईदृशीमवस्थां दृष्ट्वा महर्लोके जनोलोक तपोलोक-वासिनःभिया भगवन्तं नारायणमस्तुवन्। पृथिवी उपरितले छत्रवत् किञ्चिदवशिष्यावर्तत। तामुद्धर्तुं प्रजाःभगवन्तं प्रार्थयामासुः। विष्णुः स्वयमहं वराहरूपं धृत्वा समुद्धरिष्यामि मम प्रेमपात्रं काशीपुरं इतस्ततश्चलनं विना तत्रैव निर्विकारं वत्स्यामीति जगाद। सपदि नारायणः आदिवराहरूपं धृत्वा जले निमग्नां पृथिवीमुत्थापयामास। जलमज्जनात् संकीर्णान् नरान् काशीपुरी पूर्ववत्स्थापयांचक्रे। विहायसि छत्ररूपेण सञ्चरत् ज्येतिर्वाराणसीति वेदो वदति।

विष्णुमूर्तिः काशीवैशिष्ट्यं इत्थमवोचत्। लोकविमुक्तये कदाचिदहं विश्वनाथं प्रार्थयम्। तदा मम हृदयात् किष्कुप्रमाणं लिङ्गं निरगात्। तत् प्रतिक्षणं विवर्धमानं सत् पञ्चक्रोशात्मकं काशीपुरमभूत्। पातालात् वैकुण्ठपर्यन्तं यदा ववृधे, तदा ममेष्टदेवः महादेवः गौर्या सह

In Public domain. Digitization Muthulakshmi Research Academy
अत्राजगाम। ज्योतिर्मयं तल्लिङ्गं दृष्ट्वाहं (विष्णु:) परमाद्भुतम्। रुद्रो मां दृष्ट्वा भवता साधु कृतम्। एतज्ज्योतिर्लिङ्गं अशेषजीवेभ्यः मुक्तिं प्रदास्यति। महादेवस्य वाक्यानि श्रुत्वाहं तत्राविर्भूतं लिङ्गं सत्वात्मकमिति विज्ञाय श्रुतिशतैस्तमस्तौषम् यतः पृथिवी जडपदार्थः अतः जले निममज्ज। यस्मात्काशी सचेतना अतश्छत्राकारेण उन्ममज्ज। अत्राविर्भूता लिङ्गमूर्तिः चेतना आनन्दघना च।

जडचेतनयोरेकता कथमापन्नेति प्राज्ञा पृच्छन्ति। ब्रह्मस्वरूपा काशीपुरी जडभूतया पृथिव्या सह संसक्ता न भवति। महर्जनस्तपोलोकवासिनःपृथिव्याः जलमज्जनमद्राक्षुः। पश्चात् जलमध्यात् वाराणस्याः महौजसा छत्राकारेणाविर्भावमद्राक्षुः। अतो वाराणसीं नाहमसृजम्। तथापि विष्णुना निर्मितमिति केचिद्वदन्ति।

इदानीं वराहरूपं धृत्वाहं भूगोलमुद्धरामि। मम प्रेमास्पदा वारणासी धरित्र्यां पूर्ववत् स्थास्यति इत्युक्त्वा विष्णुर्वराहरूपं धृत्वा भूमण्डलं जलस्योपरि निदधे। तत्रत्यान् जीवान् यथापूर्वं स भगवान् न्यवेशयत्।

३१. वारणासीस्तुतिः

यस्यां स्थावरजङ्गमा जडधियः सुज्ञास्सुधर्मान्विताः
पापाश्चैव सदाशिवेन मिलिता जीवा भवन्ति ध्रुवम्॥
या गङ्गादिसमस्ततीर्थशरणं या देवता दैवतम्
सा काशी मम शङ्करस्य वसतिः प्रार्थ्या न कैस्तद्गुणैः॥

यस्मिन् क्षेत्रे स्थावरजङ्गमाः ज्ञानोपेता धर्ममनुसरन्ति। पातकिनोऽपि सदाशिवेन मिलिताः जीवरूपं वहन्ति। यत् क्षेत्रं गङ्गायमुनादि समस्ततीर्थानां शरणम्, या देवानामपि दैवतम्, शिवस्य निवासभूता सा काशी सर्वसद्गुणोपेता तां सर्वे स्तुवन्ति। पुरा वाराणस्या आविर्भावविषये मुनयः संशयग्रस्ताः विष्णुं प्रार्थयांचक्रिरे। विष्णुः तदाविर्भाव-

गाथां इत्थमवोचत्।
In Public domain. Digitization Muthulakshmi Research Academy

दुःखसागरात् ये न मुच्यन्ते तेष्वहं कलियुगेऽपि प्रसन्नः काशी-निवासमनुगृह्णामि। काशीनिवास एव परा भक्तिः तदेव महातपः काश्यां पापविमोचनमेव महत् ज्ञानम्।

सदाशिवो विष्णुमुखात् सकलगुणपूर्णां काशीकथां श्रुत्वा प्रसन्नो भूत्वा काश्यां नित्यनिवासमकार्षीत्। शिवः काशीपुरं कदापि यतो न विमुञ्चति अत एवास्य अविमुक्तमिति प्रथा समजनि।

३२. शिवमुद्दिश्य विष्णोस्तपः

भारतस्य द्रोणपर्वणि पञ्चमाध्यायः

हे मुनीन्द्र ! त्वत्प्रयुक्तमाग्नेयास्त्रं व्यर्थं बभूवेत्यश्वत्थामा यदा विललाप तदा व्यासो वदति।

पुरा श्रीमन्नारायणः निखिललोकरक्षणाय पृथिव्यामवतीर्य मैनाकपर्वते महादेवमुद्दिश्य तपश्चकार। आहारं परित्यज्य वायुभक्षकस्सन् हस्तावुन्नमय्य कठोरं तपस्तेपे। शिवस्संतुतोष। जटाजूटविराजमानो बालचन्द्रःशूलपिनाकाद्यायुधालङ्कृतकरो नागयज्ञोपवीती भस्मोद्धूलितगात्रः साक्षादतिष्ठत्। षार्थानाप्नुवन्ति। वेदशास्त्राणि तद्वेदिनो भूसुराश्च भवत एव प्रादुरभवन्। भवन्तमात्म-स्वरुपत्वेन ध्यायन्तस्समाधिनिष्ठा योगिनः ब्रह्मानन्दमनुभवन्ति। भवन्तमनेकधा भजमानस्य ममानन्यसुलभं प्रभावमनुगृहाणेति ययाचे।

महादेवः प्रीतः नारायणं करुणाकटाक्षप्रसरणपूर्वकमेव-मभाणीत्। पद्माक्षः सुरगन्धर्वकिन्नरगरुडोरगादिजीवान् लीलया विजित्य दिव्यतेजोविराजमानो भव। अन्येषामस्त्राणि शस्त्राणि वह्निर्जलानि वज्रमार्द्रं शुष्कं स्थावरं जङ्गमं भवन्तं किञ्चिदप्यापाकर्तुं न शक्नुवन्ति।अन्ततः मामपि भवान् जेतुं प्रभविष्यतीति वरं प्रससाद। अतो नारायणः सर्वैरजेयो बभूव।

In Public domain. Digitization Mumukshu Bhawan Varanasi and eGangotri Academy

३३. शिवब्रह्मणोः विष्णुस्तुतिः (भागवतम्)

भागवते दशमस्कन्दे देवकीगर्भात् श्रीकृष्णस्याविर्भाववेलायां सानुचरा देवाः नारदादयो ऋषयः तथा चतुराननो महादेवश्च देवकीगर्भस्थितं पुरुषोत्तमं तष्टुवुः, यथा :-

भगवन् सत्यव्रतानां मोक्षप्राप्तिहेतुः कालत्रयवर्तिनां पञ्चभूतानां स्रष्टा तथा च पञ्चभूतात्मकः (तत्सृष्ट्वा तदेवानुप्राविशत् इति श्रुतिः) भूतलयसाक्षिणं भवन्तमाश्रयामः। भवमायावशंवदाः ज्ञानहीनास्त्वां बहुधा निन्दन्ति। विप्रास्तु त्वं सर्वान्तर्यामीति वदन्ति। पुर्वेक्तवृत्तान्तेन विष्णुः ब्रह्मरुद्राभ्यां स्तुतो महानिति ज्ञायते।

३४.श्रीकृष्णस्य महेश्वरविजयः- भागवतदशमस्कन्धात्

बाणासुरस्य दुहिता उषासुन्दरी श्रीकृष्णपौत्रेऽनिरुद्धे अनुरक्ता। अनिरुद्धश्च स्वमायया उषासुन्दर्याः अन्तःपुरं प्रविश्य तया सह कामक्रीडामनुभवति स्म। दासीमुखादेतद्विज्ञाय बाणासुरः अनिरुद्धं नागपाशेन बबन्ध। वृत्तान्तोऽयं नारदमुखात् श्रीकृष्णः श्रुत्वा सेनासमवेतः बाणेन योद्धुं प्रातिष्ठत्। बाणोऽपि सेनासमेतः एनमुपरुरोध।सेनयोरुभयोस्सङ्ग्रामः भीषणो बभूव। बाणः चिरात् शिवभक्तः। तस्य रक्षणार्थं पुरारिः प्रमथगणेन सह योद्धुमाययौ। मुरारिः पुरारिप्रयुक्तशरजालानि शकलान्यकरोत्। पुरारिः ब्रह्मास्त्रं प्रायुयुजे। मुरारिश्च त्रिशिरसं, त्रिचरणं विकृताकृतिं महेश्वरज्वराख्यं पिशाचं प्राहिणोत्। तदसहमानो रुद्रः श्रीकृष्णं शरणं ययौ। सपदि कृष्णस्तं संजहार। पश्चात् श्रीकृष्णः बाणमुद्दिश्य सुदर्शनं प्रायुजत्। तद्बणासुरस्य सहस्रबाहुषु चतुरो बाहूनुज्झित्य शेषान् चिच्छेद। बाणासुरे प्रेम्णा महादेवः श्रीकृष्णमुपगम्य बाणस्य रक्षणाय तम् एवमस्तौषीत्।

हे कृष्ण ! त्वमनन्तोऽव्यय आदिमध्यान्तरहितोऽसि। सर्वस्मिन् त्वमसि,सर्वं त्वयि विद्यते। भगवन् भवतो दिव्यस्वरूपमविज्ञाय जीवा

In Public domain. Digitization Muthulakshmi Research Academy
इन्द्रियपरतन्त्रास्सन्तः भवत्पदसरसीरुहं प्रामुं न प्रभवन्ति। यः आत्मसाक्षिणं न जानाति स मूर्खः वञ्चकश्च सःविपरीतमत्या प्रियतमं त्वां विहाय इन्द्रियाण्यनुधावति। तद्यथा- करस्थममृतं विहाय दूरस्थहालाहलप्राशनमेव। जगदुदयपालनलयलीलाहेतुं शान्तं समानाधिकवस्तुशून्यं त्वां अहं ब्रह्मा मुनिगणश्च भजामः।

इत्थं स्तूयमानो हरिस्सन्तुष्य, मुखे दरहसितेऽङ्कुरिते चन्द्रशेखरमाह-

शङ्कर ! भवदीप्सितं वरं ददामि वृणीहि बाणासुरः अवध्यः कुतः। शङ्करोऽवदत्। भक्ताग्रेसरः प्रह्लादः तद्वंशीयः किल। अतस्तस्मै वरं प्रादाम् । कृष्ण उवाच ननु भुजबलगर्वितानां मदो दूरिकर्तव्यः अतोऽहं सहस्रबाहुषु चतुरो विहाय शेषानखण्डयम्। इतःपरमसौ वीतगर्वः मद्भक्तस्सन् जरामरणरहितः सुखं जीवेदिति निवेदितवान् तेन शङ्करस्सन्तुष्टान्तरङ्गो बभूव।

३५. ब्रह्मविष्णुमहेश्वराःएकस्मादेव शरीरादजायन्त- ऋग्वेदीयत्रिपुरमहोपनिषत्

त्रिपुर=त्रीणि पुराणि अर्थात् ब्रह्मविष्णुमहेश्वराःतेषां शरीराणि यस्मिन् विद्यन्ते स त्रिपुरः=परशिवः तत्सम्बन्धिनी उपनिषत् त्रिपुरोपनिषत्। ब्रह्मविष्णुमहेश्वराः एकस्मादेव शरीरादजायन्त इति त्रिपुरोपनिषत् कथयति।

३६. कालिकापुराणम्

पूर्वोक्तविषयं कलिकापुराणमधोदत्तविधया विवृणोति मायाया इच्छया महेश्वरस्य शरीरं त्रेधा विभक्तं बभूव। तस्य ऊर्ध्वभागे पञ्चमुखानि चत्वारः भुजाः। स भागः गौरवर्णो ब्रह्मा बभूव। मध्यभागो नीलवर्णः,स भागः एकमुखः शङ्खचक्रगदापद्मभूषितचतुर्बाहुः विष्णुरभवत्। अधो भागः पञ्चमुखः चतुर्भुजः स्फटिकधवलकायः चन्द्रशेखरः परशिवो

In Public domain. Digitization Muthulakshmi Research Academy
बभूव। पाद्मस्कन्दब्रह्मोत्तरादिपुराणानि शिवकेशवयोरभेदं नास्तीति वदन्ति। एवं स्थिते त्रिपुरोपनिषत् कालिकापुराणं च शिवकेशवौ एकस्यैव शरीरस्य भागाविति प्रत्यपादयताम् पूर्वोक्तरीत्या त्रयाणां शरीराणां समवायत्वान्महादेवस्य त्रिपुर इति व्यवहार समजनि।

३७. आन्ध्रमहाभारते सैन्धववधवृत्तान्तः

अर्जुनः सैन्धववधं प्रतिज्ञाय तां निर्वोढुमुपायं चिन्तयन्निद्रामवाप। स्वप्ने श्रीकृष्णः तस्य समीपमाययौ। अर्जुनः श्रीकृष्णमुपावेशयत्। श्रीकृष्णः एवमाह-पार्थ! चिन्तयाऽलम् शोकग्रस्तं वैरिणो हिंस्युः। अतः स्वकार्यं निर्वोढुमसौ न क्षमेत। पार्थो वदति-हे कृष्ण शोकः कथं न भवति! कृतां प्रतिज्ञां निर्वोढुं उपायं न पश्यामि। सैन्धवोऽसौ सर्वसेनानां पृष्ठतो भवति। एतच्चिन्तयतो मम खेदः कथं न भवेत्।

तद्यथार्थमेवेत्यङ्गीकुर्वाणः कृष्णो वदति। पार्थ! महता क्लेशेन तपश्चर्यया भवता लब्धस्य पाशुपतमन्त्रस्य पुरश्चरणेन साध्यमिदं भवति एतद्। अतः महादेवं ध्यायस्व। तत् श्रुत्वा सपदि पार्थः आचम्य यावत् ध्यानतत्परो बभूव, तावत् स्वयं श्रीकृष्णस्य बाहू परिगृह्य विहायसमुत्पत्य उत्तरां दिशं प्रतस्थे। पुरस्तात् पुष्पलताभूषितां रमणीयतरुसन्तानविराजितां कुबेरविहारभूमिं ददर्श। तत्र महनीयमणि-गणविराजितं मन्दिरं प्रविश्य तत्र प्रमथगणपरिवृतं पार्वतीसहितं कोटिसूर्यप्रभाभासमानं मुनिगणप्रस्तूयमानं अप्सरोगणसङ्गीत-मङ्गलमहितं राजसभालङ्कृतं शङ्करं साक्षात्कृतवान्। प्रणवपुरस्सरं प्रणमन्तौ नरनारायणौ दृष्ट्वा प्रसन्नः पार्वतीपतिः मधुरया वाचा जगाद।

हे कृष्णार्जुनौ युवयोः स्वागतम्। भवदागमनस्य कारणं निवेदयताम्। भवदभीप्सितं क्षणात् पूरयामि, तच्छ्रुत्वा नरनरायणौ नितरां प्रहृष्टौ महादेवं शतधा अस्तौष्टाम्। तदा श्रीकृष्णः पाशुपत-मर्थयेति पार्थं यावत्प्रबोधयति तावदर्जुनस्तद्वरमर्थयितुं विश्वेश्वरम - पश्यत्। अहो पुरा आत्मना मुकुन्दाय समर्पितानि माल्यानुलेपनादीनि

In Public domain. Digitization Muthulakshmi Research Academy
पूजाद्रव्याणि परमेश्वरशरीरे दृष्ट्वा महाश्चर्यमनुभूय मुरहरपुरहरयोरेकत्वं हृदि विभाव्य भवदीयदिव्यास्त्रमनुगृहाणेति अर्जुनः प्रार्थयामास। भक्तवत्सलोऽसौ शिवः नरनारायणौ दरहासेनावलोक्य पुरतः सरसि मम धनुर्बाणौ विद्येते। तावत्तत्रानयतामित्यादिदेश। यावत्कृष्णार्जुनौ तत्र गत्वा पश्यतः, तावत् विषज्वाले वमन्तौ द्वौ सरीसृपौ तत्र दृष्टौ। तावाश्चर्यनिमग्नौ भूत्वा स एव दिव्यास्त्र इति निश्चित्य पादौ प्रक्षाल्य आचम्य शुचिनौ भूत्वा तत्समीपं ययतुः। तदा तौ धुनुर्बाणाविव वीक्ष्य तौ महादेवसन्निधिं आनयताम्। तदा नीललोहितवर्णः कश्चन वर्णी शिवपार्श्वतः गत्वा धनुर्बाणौ गृहीत्वा शरं सन्धाय प्रयोगोपसंहारौ यावदाचरति तावत् गाण्डीवी तत्कृत्यं श्रद्धया ददर्श। तदा पुरारिरर्जुनाय प्रयोगोपसंहारावबोधयत् तत्सहायसम्पदा गाण्डीवी सैन्धवं जघान। कथेयं संस्कृतमूलमेवाश्रिता।

अर्जुनेन स्वहस्ताभ्यां श्रीकृष्णाय समर्पितानि गन्धमाल्यादीनि शिवशिरसि यद्दृष्टानि तेन हरिहराभेदो निरूपितः। इतोऽप्यधिकं किमावश्यकम्। न केवलं हरिहरयोरभेदः अपि तु सर्वेषां दिवौकसां तत्त्वमभिन्नमेव।

३८. सर्वेषामपि देवानां तत्त्वमेकमेव। भगवद्गीता

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तानेव विदधाम्यहम्॥ (७.२९)

कामितार्थसिद्धये नराः यां यां देवतां श्रद्धया आराधयितुं कामयन्ते, अर्थात् धनं कामयमानो लक्ष्मीं दीर्घसौमङ्गल्यं कामयमाना गौरीं, ऐश्वर्यं अन्वेक्षमाणो महेन्द्रं, सन्तानकामी षण्मुखं आरोग्यकामी भास्करं एवं तत्तत्कामनामनुरुध्य तत्तदनुग्रहे प्रसिद्धदेवान् देवीर्वा भजन्ते। पूर्वजन्मवासनालब्धया भक्त्या श्रद्धया च आचरन्ति। तेषामहमन्तर्यामी सन् तत्तच्छ्रद्धां वर्धयामि। तया श्रद्धया तत्तद्देवतासु

In Public domain. Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेषां भक्तिर्वर्धते। अथ तत्राभीष्टमपि तद्देवतामुखादेव फलति। कर्मफलविभागवेत्ता वासुदेव एव सर्वं विदधाति।

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ (९.२३)

अयं श्लोकोऽपि पूर्वश्लोकमेव समर्थयति। ऐहिकामुष्मिक-फलार्थिनः स्वेष्टदेवतायां श्रद्धावन्तः सैव परदेवतेति मत्वा तदाराधने नाहं धन्यो भवामीति मत्वा इन्द्रादीन् यज्ञकर्मभिस्तत्तन्मन्त्रजपेन वा आराधयन्ति। त एवं मन्यन्ते यदियं देवता मामकीना तस्या आराधकोऽहमिति। परं बह्म सर्वात्मकमिति यतस्ते न जानन्ति अतस्तेषां पूजा विधिपूर्विका न भवति। ते मामेव अविधिपूर्वकं भजन्ते। तस्मात्तत्देवताद्वारैवाहं तत्प्रार्थितफलं प्रापयामि।

पूर्वोक्तभगवद्गीता प्रमाणपर्यालोचनेन ज्ञायते यत् शिव-केशव-देवेन्द्र-गरुड-नरहरि-गिरिजापद्मालयादि नामानि तत्तद्रूपाणि च यद्यपि भिन्नत्वेन दृश्यन्ते 'तथापि तेषु विराजमानं परब्रह्मतत्त्वमेक-मेवेति स्फुटं विज्ञायते।

३९. चतुर्मुखपञ्चमुखकृता चतुर्भुजस्तवः - आन्ध्रभागवतदशमस्कन्धः

देवकीगर्भात् श्रीकृष्णस्याविर्भावसमये सानुचरास्सुराः नार-दादयो देवर्षयश्चानृसृतेषु सत्सु त्रिनेत्रश्चतुर्मुखश्चैवं अस्तौष्टाम्-भगवन् सत्यव्रतानां मोक्षप्राप्तिसाधनं, कालत्रयवर्तिनां पञ्चभूतानां स्रष्टा पञ्चभूतात्मकः भूतलयसाक्षी च भवान् त्वां आश्रयामहे। ये भवन्माया-धीनाः ते ज्ञानहीनाः त्वां बहुधा वदन्ति, विज्ञास्तु भवन्तं सर्वान्तर्यामिनम् अभिजानन्ति। अत्र ब्रह्मरुद्रायो विष्णुर्महानिति निरूपितम्।

In Public Domain. Digitization by Muthulakshmi Research Academy

आन्ध्रभागवतस्य दशमस्कन्धः

शुकयोगीन्द्रः परीक्षितं सन्दिशति।

आन्ध्र्याम् मत्तेभवृत्तम् :-

मुनिनाथोत्तम देवमानवुललो मुक्कण्टिसेविञ्चु वा
रनयंबुन् बहुवस्तुसम्पदल सौख्यानन्दुलै युण्डु न
व्वनजाताक्षु रमामनोविभुनि शश्वद्भक्ति सेविंचु स
द्घनपुण्युल् गडु पेदलौ कतन चिक्कुन् नाकेरिंगिंपवे ।

सारांशः- शिवः त्रिगुणान्वितः शक्तिसहितः। तस्मात्तदाराधकानां सम्पदो भवन्ति। पुरुषोत्तमस्तु गुणातीतः। रागादिदोषरहितैस्स आराध्यः तेषामैहिकसुखसम्पदो न भवन्ति।

सङ्ग्रहार्थः- शिवाराधनया ऐहिकसम्पदो लभ्यन्ते । विष्णुपूजया आमुष्मिकसुखं सिद्ध्यति।

४१.शिवकेशवयोर्भक्त्यां तारतम्यम् - आन्ध्रभागवतम्

शुकनाम्नो दैत्यस्य पुत्रः वृकाभिधेयो वर्तते। स नारदम- पृच्छद्यत् हरिहरब्रह्मणां कतमस्सुजन इति। गुणदोषान् विदित्वा सपदि फलप्रदाता शिव इति नारदः प्रत्यवोचत्। अनुपदमेव केदारक्षेत्रं गत्वा वृकः शिवमक्षिसात्कर्तुं स्वशरीरात् मांसमुत्कृत्य अग्नौ पातयांचक्रे। किन्तु साफल्यं नाभजत। सप्तमेऽहनि परशुना स्वमस्तकं छेत्तुं यावदुदयुङ्क्त तावच्छिवः प्रत्यक्षीभूय तं निवार्य वरं प्रार्थय इत्यवोचत्।

वृकः पृच्छति यत् - यस्य शिरस्यहं हस्तं निदधामि, तत् शिरः शतशकलानि भूत्वा भूमौ निपतेदिति। तथाऽस्त्विति यावन्महादेवो वदति, तावदेव तत्फलपरीक्षणाय वृकश्शिव शिरसि हस्तं न्यस्तुमुदयुङ्क्त। शिवो धावति स्म। वृकस्तमनुधावति स्म।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitization by Muthulakshmi Research Academy
लोकनायकसंस्थोऽपि स न विससर्ज। अन्ततः क्षीरार्णवमुपजगाम । तत्र शयित्वा श्रीदेव्यास्सेवां लभमानं श्रीमन्नारायणमुपजगाम। विष्णुः हठादुत्थाय वामनस्येव वटुरूपं सन्धार्य वृकमुपगम्य वदति। किमर्थमियदूरमागतोऽसि इति मृदुमधुरवाग्भिरेवमुवाच। अयि सखे! वृक यदि त्वं स्नात्वा सन्ध्यामुपास्य शुचिना यदि व्रजसि, स शिवः सुखेन लभ्यते। तच्छ्रुत्वा स स्नात्वा सन्ध्यामुपास्यमानः यावच्छिरः स्पृशति तावत् तच्छतधा विदीर्य स दुर्मरणमवाप्नोत्।

उक्तरीत्या श्रीमन्नारायणो महादेवमरक्षत् इति ज्ञायते।

समाप्तोऽयं हरिहरतत्त्वभूमिका ग्रन्थः।

॥ ओम् तत् सत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Some Important publications of Sanskrit Academy

01. Catalogue of Sanskrit Manuscripts in (O.U.) Library	150-00
02. Vikramorvasiyam	30-00
03. Sahitya Ratnakara 1-50/=,II-50/=and III-50/=	150-00 (Set)
04. Pada Manjari (A Commentary on Kasika) I-120/=and II-120/-	240-00 (Set)
05. Samskrita Kavijeevitam I-90/- and II-90/-	180-00 (Set)
06. Kasika Sutra Suchi III Vol.I-75/- and II-75/-	150-00 (Set)
07. Kasika Vivarana Panjika (Nyasa) I-75/- and II-75/-	150-00 (Set)
08. Sangita Chandra	75-00
09. Paribhashendusekhara	90-00
10. Ayurvedabdhishikara I-100/- , II- 125/-	225-00 (Set)
11. Katha in Sanskrit	40-00
12. Laghu Kavyani (Nilakantha Dikshita)	25-00
13. First Book of Bhandarkar	50-00
14. Sitaramavihara Kavya	25-00
15. Rgarthasara	25-00
16. Aryasaptasati	50-00
17. Danoddyota I-25/-,II-30/- and III-35/-	90-00 (Set)
18. Samskrita Margopadesika	50-00
19. Pandita Raja Kavya Sangraha	150-00
20. Prakrita Patha Malika	20-00
21. Gita Govindam	200-00

To be published

(Second Edition)

1. Kasika
2. Kshemendra Laghu Kavya Samgraha
3. Vritta Ratnakara